HIGHER SECONDARY COURSE
SECOND LANGUAGE
SANSKRIT
CLASS XI

# उच्चतरमाध्यमिकपाठ्यक्रमः

द्वितीयभाषा
संस्कृतम्
कक्षा ११

Government of Kerala
DEPARTMENT OF EDUCATION

State Council of Educational Research and Training (SCERT); Kerala

2016

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्य विधाता।
पञ्जाब सिन्ध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा,
उच्छल जलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जयगाथा।
जनगण मंगलदायक जय हे,
भारत भाग्य विधाता।
जय हे, जय हे, जय हे,
जय जय जय, जय हे ।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

***Prepared by*** :
**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
*website* : www.scertkerala.gov.in
*e-mail* : scertkerala@gmail.com
Phone : 0471 - 2341883, Fax : 0471 - 2341869
© Department of Education, Government of Kerala
*To be printed in quality paper - 80gsm map litho (snow-white)*

# प्रास्ताविकम्।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा उच्चतरविद्यालयानां कृते रचितं पाठपुस्तकम् इदम्। परिवर्तितपाठ्यपद्धत्यनुसारमेव इदं विरचितम्। राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा निर्दिष्टां पाठ्यपद्धतिम् अनुसृत्य राज्यस्तरीयं साहचर्यं च परिचिन्त्य एव पाठभागाः निर्द्धारिताः। एवम् उच्चतरविद्यालयस्तरे प्रथमवर्षे उपभाषात्वेन संस्कृतभाषापिपठिषूणां विद्यार्थिनां कृते समाकलिते अस्मिन् पुस्तके, सुभाषितं, रूपकं, कथा, काव्यम्, उपन्यासः, छन्दोऽलङ्काराः च प्रस्तूयन्ते। पाठ्यांशानां सम्यगवबोधनार्थमावश्यकं लघुव्याख्यानमप्यत्रायोजितम्।पठनोपकारकाणि अभ्यासकार्याणि च अन्तर्भावितानि। अभ्यासकार्याणि पाठभागानाम् अन्ते एव दत्तानि। अध्यापकैःअभ्यासकार्यान्तराण्यपि यथायथं विरच्यन्ताम्। राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा समायोजितायां तत्तद्विषये प्रवीणानां महाविद्यालयाध्यापकानामन्येषां शिक्षाशास्त्रज्ञानां नेतृत्वे प्रवृत्तायां कर्मशालायामेव पुस्तकस्यास्य सङ्कलनं कृतम्। पुस्तकस्यास्योपयोगिता संवर्धनानुगुणं निर्देशादिकम् अध्यापकैः यदि सूच्येत तर्हि भविष्यत्काले तस्योपयोगः क्रियेत। पाठपुस्तकमिदमुद्दिष्टं कार्यं निर्वोढुं प्रभवेदिति प्रतीक्षे।

**डॉ पि. ए. फातिमा**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्।

# TEXT BOOK DEVELOPMENT TEAM

1. **Dr. MAHESH BABU S. N.** , HSST (Jr) SANSKRIT, GMHSS NADAVARAMBA,THRISSUR
2. **RAJENDRAN PILLAI**, HSST (Jr) SANSKRIT, SNSMHSS ELAMPALLOOR, KOLLAM
3. **Dr. V. G . THANU**, HSST (Jr) SANSKRIT, GMHSS FOR BOYS THRISSUR
4. **PRAMEELA DEVI S.**, HSST (Jr) SANSKRIT, GMMGHSS PALAKAD
5. **DEVIPRASAD A.** , HSST SANSKRIT, IJMHSS KOTTIYUR, KANNUR
6. **THANKARAJAN NAMBOODIRI V. N.** , HSST (Jr) SANSKRIT, CBHSS VALLIKKUNNU, MALAPPURAM
7. **JAYAMOHANA KURUKKAL S.**, HSST (Jr) SANSKRIT, GHSS MUTTARA, KOLLAM
8. **RAJENDRAPRASAD**, HSST(Rtd.) SANSKRIT, ERANAKULAM
9. **N.K. RAMACHANDRAN**, (Rtd.) DEO WAYANAD
10. **SAJI KUMAR A. V.**, GHSS KARUPADANNA, THRISSUR

## EXPERTS

**Dr. P. NARAYANAN NAMBOODIRI**, PROFESSOR OF SANSKRIT, UNIVERSITY OF CALICUT

**Prof. V. MADHAVAN PILLAI**, ASSOCIATE PROF. (Rtd) in SANSKRIT, GOVT. WOMEN'S COLLEGE , TVPM.

### GRAPHICS & LAY OUT

**SHAJI B. MOMENTS**, KUNDARA

### ILLUSTRATION

**JIJO SOMAN**, ATTINGAL

### ADVISOR

**Prof. R.VASUDEVAN POTTI,** SIVADHAMAM, SREEKANDESWARAM

### ACADEMIC COORDINATORS

**Dr. T. KERALA SREEMATHI ,** RESEARCH OFFICER, SCERT

**Dr. REKHA.R.NAIR,** RESEARCH OFFICER, SCERT, THIRUVANANTHAPURAM

# विषयानुक्रमणिका


| पाठस्य नाम | व्यवहारः | पुटसंख्या |
|---|---|---|
| **१. एककम् - पाथेयम्** | | |
| १.१ पाथेयम् | पद्यम् | २ |
| १.२ कर्मणैव हि संसिद्धिः | कथा | १३ |
| १.३ पुरतो भ्रम लोकचक्र | पद्यम् | १९ |
| **२ एककम् - मौलिकम्** | | |
| २.१ शब्दाह्वयं ज्योतिः | कथा | ३४ |
| २.२ शरीरमाद्यं खलु धर्मसाधनम् | उपन्यासः | ४१ |
| २.३ तत्त्वामृतबिन्दवः | पद्यम् | ४६ |
| **३ एककम् - पीयूषम्** | | |
| ३.१ हुतं च दत्तं च तथैव तिष्ठति | रूपकम् | ५२ |
| ३.२ भावैकरसं मनः | पद्यम् | ६० |
| **४ एककम् - जागरणम्** | | |
| ४.१ ज्ञानं कार्यान्वितं वरम् | कथा | ७२ |
| ४.२ उत्तिष्ठत जाग्रत | उपन्यासः | ८० |
| **५ एककम् - भूषणम्** | | |
| ५.१ अलङ्काराः | आख्यानम् | ८६ |
| ५.२ वृत्तानि | आख्यानम् | ९१ |
| **अनुबन्धः** | | ९८ |

भद्रं कर्णेभिः श्रुणुयाम देवाः
भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिः
व्यशेम देवहितं यदायुः।

# पाथेयम्



# १.१ पाथेयम्

**पठनाधिगमाः**

- सुभाषितं पठति।
- पदानि विवेचयति।
- पदार्थं वदति।
- सुभाषितानामाशयं लिखति।
- गद्यक्रमं लिखति।
- वृत्तनिर्णयं करोति।
- वर्तमानकाललकारं क्रोडीकरोति।

संस्कृतवाङ्मये विद्यमानानि मौक्तिकानि भवन्ति सुभाषितानि । सुष्ठु शोभनं वा भाषितं सुभाषितम्। तानि चिन्तनोद्दीपकान् आशयान् प्रतिपादयन्ति। एतैस्सुभाषितैः लोके सत्यधर्मादीनां मानवमूल्यानां स्वीकारः तदितरेषां निरासश्च द्योत्यते। सुभाषितसाहस्री, सुभाषितरत्नावली इत्यादयो ग्रन्थाः उपलभ्यन्ते। भर्तृहरिणा विरचितं शतकत्रयं सुभाषितानां सञ्चयः भवति । हितोपदेशपञ्चतन्त्रादिषु ग्रन्थेष्वपि बहूनि सुभाषितानि दृश्यन्ते तथा काव्यनाटकादिष्वपि । तेषु कानिचिदत्र प्रतिपाद्यन्ते।

यथा यात्रायां पथि भोज्यं पाथेयम् उपकारकं भवति तथा जीवितयात्रायां सहायकानि भवन्ति इमानि सुभाषितानि।

**साहित्यसङ्गीतकलाविहीनः**
**साक्षात्पशुः पुच्छविषाणहीनः।**
**तृणं नखादन्नपि जीवमान-**
**स्तद्भागधेयं परमं पशूनाम्।।१।।**

साहित्यसङ्गीता-दिकलाविहीनानां गतिः का ?

**पदच्छेदः**

नखादन्नपि - नखादन् + अपि,
जीवमानस्तद्भागधेयम् - जीवमानः + तत् + भागधेयम्।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| साहित्यसङ्गीतकलाविहीनः | - | काव्यनृत्तगीतवाद्यशिल्प - शास्त्रादीनां ज्ञाने आस्वादने च अपटुः। |
| पुच्छविषाणहीनः | - | लाङ्गूलश्रृङ्गरहितः |
| साक्षात् | - | प्रत्यक्षतया |
| पशुः | - | जन्तुः |
| तृणम् | - | घासम् |
| नखादन्नपि | - | अभक्षयन्नपि |
| जीवमानः | - | प्राणधारणं कुर्वन् (वर्तते) |
| तद् | - | तृणखादनं विना जीवनम् |
| पशूनां | - | जन्तूनाम् |
| परमम् | - | श्रेष्ठम् |
| भागधेयम्। | - | भाग्यम्। |

**तात्पर्यार्थः**

साहित्यसङ्गीतादिषु अतत्परो जनः श्रृङ्गलाङ्गूलरहितः चतुष्पाद् भवति। सः घासं न खादतीति जन्तूनां भाग्यम् एव। अरसिको जनः पशुवत् भवतीति आशयः।

**व्याख्या**

सहितयोः (शब्दार्थयोः) भावः साहित्यं, काव्यसौन्दर्यप्रतिपादकं शास्त्रम्। साहित्यं च सङ्गीतं च कला च साहित्यसङ्गीतकलाः,ताभिः विहीनः साहित्यसङ्गीतकलाविहीनः। शिल्पाद्याश्चतुष्षिष्टिसङ्ख्याकाः कलाः । साक्षात् इत्यव्ययम्। पुच्छविषाणाभ्यां हीनः पुच्छविषाणहीनः। पुच्छं -पुच्छोऽस्त्री लूमलाङ्गूले इत्यमरः। तृणम् -शष्पं बालतृणं घासः यवसं तृणमर्जुनमित्यमरः। भागधेयम् - दैवं दिष्टं भागधेयं भाग्यमित्यमरः।

**पाठभेदः**

सङ्गीतसाहित्यकलाविहीनः ।

**वृत्तम्**

उपजातिः ।

पाथेयम्

खलसज्जनानां मैत्रीभेदः कीदृशः?

**आरम्भगुर्वी क्षयिणी क्रमेण**
**लघ्वी पुरा वृद्धिमती च पश्चात्।**
**दिनस्य पूर्वार्द्धपरार्द्धभिन्ना**
**छायेव मैत्री खलसज्जनानाम्।। २।।**

**पदच्छेदः**

छायेव - छाया + इव ।

| अन्वयः | | अर्थः |
|---|---|---|
| खलसज्जनानाम् | - | दुष्टानां श्रेष्ठानां च |
| मैत्री | - | मित्रता |
| आरम्भगुर्वी | - | आदौ महती |
| क्रमेण | - | क्रमानुसारम् |
| क्षयिणी | - | क्षीयमाणा, क्षयशीला |
| पुरा | - | आदौ |
| लघ्वी | - | स्वल्पा (लघ्वी x गुर्वी ) |
| पश्चात् च | - | अनन्तरं च |
| वृद्धिमती | - | बृहती, वृद्धियुक्ता |
| दिनस्य | - | दिवसस्य |
| पूर्वार्द्धपरार्द्धभिन्ना | - | प्रथमार्धे उत्तरार्धे च व्यत्यस्ता |
| छाया इव | - | अनातपः (shadow) इव |
| (भवति)। | - | (अस्ति)। |

## तात्पर्यार्थः

दुर्जनानां मैत्री दिनस्य पूर्वार्धच्छायासदृशी प्रथमं गुर्वी क्रमेण क्षयिणी च भवति । किन्तु सज्जनानां मैत्री दिनस्य परार्धच्छाया इव प्रथमं लघ्वी पश्चात् वृद्धिमती च भवति ।

## व्याख्या

आरम्भे गुर्वी आरम्भगुर्वी। सन् चासौ जनश्च सज्जनः। खलाः सज्जनाः च खलसज्जनाः, तेषां खलसज्जनानाम्। खलः - पिशुनो दुर्जनः खलः इत्यमरः। मैत्री - मैत्री मैत्र्यमित्यमरः। दिनः -दिनाऽहनी वा तु दिवसवासरौ इत्यमरः। छाया-छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः इत्यमरः।

**पाठभेदः**

प्रारम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमुपैति पश्चात् ।

**वृत्तम्**

उपजातिः ।

**धीराः के?**

**निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा**
**न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।। ३।।**

**पदच्छेदः**

अद्यैव - अद्य + एव ।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| नीतिनिपुणाः | - | नयकोविदाः |
| निन्दन्तु | - | निन्दां कुर्वन्तु |
| यदि वा स्तुवन्तु | - | अथवा प्रशंसां कुर्वन्तु |
| लक्ष्मीः | - | सम्पत्तिः |
| समाविशतु | - | उपसर्पतु |
| यथेष्टं गच्छतु | - | इच्छानुसारं प्रयातु |
| मरणम् | - | मृत्युः |
| अद्यैव वा | - | अस्मिन्नेव काले वा |
| युगान्तरे वा | - | कालान्तरे वा |
| अस्तु। | - | भवतु। |

| | | |
|---|---|---|
| धीराः | - | धैर्यशालिनः, स्थितप्रज्ञाः (विवेकिनः) |
| न्याय्यात् | - | न्याययुक्तात्,न्यायोचितात् |
| पथः | - | मार्गात् । |
| पदम् | - | चरणम् |
| न प्रविचलन्ति। | - | न व्यतिचलन्ति। |

**तात्पर्यार्थः**

नीतिशास्त्रपण्डिताः प्रशंसन्तु अथवा भर्त्सयन्तु, समृद्धिः समाविशतु प्रयातु वा, मृत्युः अद्यैव भवतु अन्यस्मिन् युगे वा भवतु, विवेकिनः पुरुषाः न्यायाधिष्ठितमार्गात् एकमपि पदं कदापि न व्यतिचलन्ति। सुखदुःखयोर्विषयेषु विवेकिनः पुरुषाः पर्वता इव अचञ्चला एव तिष्ठन्ति।

**व्याख्या**

नीतिषु निपुणाः नीतिनिपुणाः। निन्दन्तु - णिदि निन्दायां लोट् परस्मैपदी प्र.पु.ब.व। निन्दतु/निन्दतात् निन्दतां निन्दन्तु। स्तुवन्तु - ष्टुञ् स्तुतौ लोट् परस्मैपदी प्र.पु.ब.व। स्तौतु/स्तुतात् स्तुताम् स्तुवन्तु। यथेष्टम्- इष्टमनतिक्रम्य । समाविशतु - सम् आ उपसर्गपूर्वक विश् प्रवेशने लोट् परस्मैपदी प्र.पु.ए.व। अस्तु - अस् भुवि लोट् परस्मैपदी प्र.पु.ए.व.। अस्तु/स्तात् स्ताम् सन्तु। गच्छतु गम्लृ गतौ लोट् परस्मैपदी प्र.पु.ए.व.। न्यायात् अनपेतो न्याय्यः तस्मात् न्याय्यात्।

**पाठभेदः**

लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम्।

**वृत्तम्**

वसन्ततिलकम्।

परोपकारिणां स्वभावः कीदृशः ?

**भवन्ति नम्रास्तरवः फलागमै-**
**र्नवाम्बुभिर्दूरविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः**
**स्वभाव एवैष परोपकारिणाम्।। ४।।**

**पदच्छेदः**

नम्रास्तरवः - नम्राः + तरवः, फलागमैर्नवाम्बुभिर्दूर-विलम्बिनो घनाः - फलागमैः + नवाम्बुभिः + दूरविलम्बिनः + घनाः, स्वभाव एवैष - स्वभावः + एव + एषः ।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| तरवः | - | वृक्षाः |
| फलागमैः | - | फलानां प्रादुर्भावैः |
| नम्राः | - | अधोमुखाः |
| भवन्ति । | - | सन्ति। |
| घनाः | - | मेघाः |
| नवाम्बुभिः | - | नूतनजलबिन्दुभिः |
| दूरविलम्बिनः | - | दूराद् अन्तरिक्षाद् अधः भूमण्डलं यावद् गच्छन्तः |
| भवन्ति । | - | विद्यन्ते। |
| सत्पुरुषाः | - | सज्जनाः |
| समृद्धिभिः | - | ऐश्वर्यैः |
| अनुद्धताः | - | विनीताः (निरहङ्कारिणः) |
| भवन्ति । | - | वर्तन्ते। |

| | | |
|---|---|---|
| एषः | - | अयम् |
| परोपकारिणाम् | - | लोकोपकारिणाम् |
| स्वभाव एव । | - | प्रकृतिः एव। |

**तात्पर्यार्थः**

फलवन्तो वृक्षाः अवनताः भवन्ति। मेघाः नूतनवर्षाम्बुभिः विनम्राः भवन्ति। एवं सज्जनाः अभिवृद्धौ निरहङ्काराः भवन्ति। एषः लोकोपकारिणां स्वभाव एव। ऐश्वर्यसाकल्येऽपि सज्जनाः विनयान्विताः भवन्ति इति भावः।

**व्याख्या**

तरवः - वृक्षो महीरुहश्शाखी विटपी पादपस्तरुः। भवन्ति - भू सत्तायां परस्मैपदी लट् प्र.पु.ब.व। भवति भवतः भवन्ति। दूरं विलम्बन्ते इति दूरविलम्बिनः ।

**पाठभेदः**

भवन्ति नम्रास्तरवः फलोद्गमैः ।

**वृत्तम्**

वंशस्थम् ।

**प्रारभ्यते न खलु विघ्नभयेन नीचैः**
**प्रारभ्य विघ्नविहता विरमन्ति मध्याः।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः**
**प्रारब्धमुत्तमजना न परित्यजन्ति।। ५ ।।**

अधममध्यमो-त्तमानां स्वभावविशेषाः के?

**पदच्छेदः**

विघ्नविहता न - विघ्नविहताः + न, पुनरपि -पुनः + अपि, उत्तमजना न - उत्तमजनाः + न ।

| अन्वयः | | अर्थः |
|---|---|---|
| नीचैः | - | अधमैः |
| विघ्नभयेन | - | कार्यस्य विघ्नभिया |
| न प्रारभ्यते | - | न आरभ्यते |
| खलु | - | एव, निश्चयेन |
| मध्याः | - | मध्यस्थाः (नोत्तमाः न वा अधमाः) |
| प्रारभ्य | - | आरभ्य |
| विघ्नविहताः | - | विघ्नैः बाधिताः |
| विरमन्ति | - | प्रतिनिवर्तन्ते |
| उत्तमजनाः | - | श्रेष्ठाः |
| विघ्नैः | - | प्रतिबन्धैः |
| पुनः पुनः | - | मुहुर्मुहुः, (वारं वारम्) |
| प्रतिहन्यमानाः अपि | - | निरुद्धाः च |
| प्रारब्धम् | - | आरब्धम् (कर्म) |
| न परित्यजन्ति। | - | न त्यजन्ति। |

**तात्पर्यार्थः**

अधमाः विघ्नं सम्भाव्य कार्यस्यारम्भमेव न कुर्वन्ति। मध्यमाः कार्यं प्रारभ्यापि तस्य दुष्करताम् अनुभूय प्रतिनिवर्तन्ते। उत्तमास्तु विघ्नान् विगणय्य कार्यं पूर्णतां नयन्ति । तदनन्तरम् एव ते कार्यात् विरमन्ति। एवं आरब्धप्रयत्ना उत्तममध्यमाधमभेदेन त्रिधा विभक्ताः।

**व्याख्या**

नीचः - विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः इत्यमरः। विघ्नः -विघ्नोऽन्तरायः प्रत्यूहः इत्यमरः। विघ्नेभ्यो

भयः विघ्नभयः तेन विघ्नभयेन, विघ्नैः विहताः विघ्नविहताः। उत्तमाश्च ते जनाः च उत्तमजनाः। प्रारभ्य - प्र आङ् उपसर्गपूर्वक रभ् ल्यबन्तमव्ययम्। विरमन्ति - वि रम् परस्मैपदी लट् प्र.पु.ब.व। विरमति विरमतः विरमन्ति। परित्यजन्ति - परि उपसर्ग पूर्वक त्यज् परस्मैपदी लट् प्र.पु.ब.व। परित्यजति परित्यजतः परित्यजन्ति।

## पाठभेदः

आरभ्यते न खलु विघ्नभयेन मूढैः
आरभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति।।

## वृत्तम्

वसन्ततिलकम्।

## पठनप्रवर्तनानि

- सुभाषितानि सङ्घशः व्यक्तिशश्च ताललयसमन्वितम् आलपत।
- सुभाषितानाम् अन्वयानुसारम् आशयमवगम्य टिप्पणीपुस्तके लिखत, शब्दकोशे निवेशयत च।

**श्रद्धेयांशाः** नूतनपदचयनम् अर्थनिर्धारणञ्च।
सन्धियुक्तपदचयनं विश्लेषणञ्च।
समस्तपदचयनं विग्रहवाक्यलेखनञ्च।
सुभाषितस्य आशयलेखनम्।

- सुभाषितानि पठित्वा समानाशययुक्तानि अन्यानि सुभाषितानि सूक्तीर्वा सञ्चित्य लिखत।
- पाथेयम् इति शीर्षकस्य औचित्यमधिकृत्य चर्चां कुरुत।
  चर्चासूचकाः -पथि भोज्यं द्रव्यं पाथेयम्, सुभाषितानां औचित्यम्, जीवितोपयोगिता।
- उदाहृतानुसारम् अधो दत्तानि वाक्यानि परिवर्तयत।

  उदा - रामः ग्रामं गच्छतु। रामः ग्रामं गच्छति।

  क) ते क्षीरं पिबन्तु। ______________।

  ख) त्वं संस्कृतं वद। ______________।

  ग) अहं विद्यालयात् आगच्छानि। ______________।

  घ) यूयं क्रीडाङ्कणे क्रीडत। ______________।

  ङ) वयं चलच्चित्रं पश्याम।______________।

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्र. सं | प्रवर्तनानि | भागिक्तया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | आलपितम् | | १/२/३/४ | |
| २ | आशयः लिखितः | | १/२/३/४ | |
| ३ | सुभाषितानि चितानि | | १/२/३/४ | |
| ४ | चर्चा कृता | | १/२/३/४ | |
| ५ | वाक्यपरिवर्तनं कृतम् | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# १.२ कर्मणैव हि संसिद्धिः

**पठनाधिगमाः**

- कथां पठति।
- संश्लिष्टपदानां समस्तपदानां च पट्टिकां करोति।
- पदार्थं वदति।
- कथां भावात्मकतया वाचयति।
- कथासारं स्ववाक्यैः लिखति।
- प्रथमाद्वितीयाविभक्तिरूपाणि लिखति।
- कथांशं सम्भाषणरूपेण परिवर्त्य लिखति।

**"तिष्ठत तत्रैव तिष्ठत। भवदीयं सर्वं प्रयच्छत। नो चेत् प्राणान् हरिष्याम्यहम्।" काननमध्यात् कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन्। झटिति तीक्ष्णं रक्तपङ्क्तिलं खड्गं प्रसार्य भयङ्करः कश्चन निषादः तेषां पुरतः आपतत्।"सर्वमपि प्रयच्छत" सः उच्चैराक्रोशत्।**

सप्तर्षयः गर्जनं श्रुत्वा चकिताः।

**व्याख्या**

तिष्ठत- ष्ठा गतिनिवृत्तौ प प लोट् म पु ब व। भवदीयम् -भवतः इदम्। तव इदम्-त्वदीयम्। मम इदम्-मदीयम्। तस्य इदम्-तदीयम्। सर्वम् -विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निश्शेषं समग्रं सकलं पूर्णमखण्डं स्यादनूनके इत्यमरः। प्रयच्छत - प्र इत्युपसर्गपूर्वक दाण् धातोः (दाण् दाने) लोट् म पु ब व। नो चेत् - निपातमव्ययम्। प्राणाः - नित्यबहुवचनान्तम्।

अभूतपूर्वां कामप्यनुभूतिम्

**तेष्वन्यतमः महान् योगी वसिष्ठस्तमपृच्छत् "अये वत्स कस्त्वम् ? केवलं कमण्डलुर्वल्कलश्च अस्माकं धनम् । तेन तव किं प्रयोजनम् ?"। "कमण्डलुश्चेत् कमण्डलुः, दातव्यं तत् " निषादः सक्रोधमवदत्। तथापि मुनेः 'वत्स' इति संबोधनेन तस्य हृदयमभूतपूर्वां कामप्यनुभूतिम् अलभत ।**

---

व्याख्या

हरिष्याम्यहम्- हरिष्यामि + अहम्। काननम्- अटव्यरण्यं विपिनं गहनं काननं वनम्। हरिष्यामि- हृञ् हरणे प प लृट् उ पु ए व। श्रुत्वा- श्रु धातोः क्त्वान्तम् अव्ययम्। सप्तर्षयः - सप्त च ते ऋषयः च (तत्पुरुषसमासः)। चकिताः - स्तब्धाः। अभवन् - भू धातोः लङ् प प प्र पु ब व। झटिति - शीघ्रं त्वरितं लघु क्षिप्रं द्रुतं सत्वरं चपलं तूर्णमविलम्बितमाशु च। तीक्ष्णम्- तिग्मं तु तीक्ष्णम् खरम्। रक्तम्- रुधिरोऽसृक् लोहितास्त्ररक्तक्षतजशोणितम्। खड्गः - खड्गे तु विनिस्त्रिंशश्चन्द्रहासमरिष्टयः कौक्षेयको मण्डलाग्रः करपालः कृपाणवत्। निषादः -निषादश्वपचावन्तेवासी चण्डालपुक्कसाः। आपतत् – आङ् इत्युपसर्गपूर्वक पत् धातोः प प लङ् प्र पु ए व। भयङ्करः - भयं करोति इति । आक्रोशत् - आ इत्युपसर्गपूर्वक क्रुश् धातोः प लङ् प्र पु ए व।

योगी - योगः अस्य अस्ति इति योगी। योगः कर्मसु कौशलम् , योगश्चित्तवृत्तिनिरोधः इत्यादि शास्त्रेषु प्रसिद्धम्। अपृच्छत् - प्रच्छ् ज्ञीप्सायां प प लङ् प्र पु ए व। अये,अयि, रे इत्यादि सम्बोधनद्योतकाः निपाताः। कस्त्वम् - कः + त्वम्। वल्कलम् - त्वक् स्त्री वल्कं वल्कलमस्त्रियाम्। दातव्यं -दातुं योग्यम्। अभूतपूर्वां -पूर्वं न भूताम्। कामप्यनुभूतिम् - कामपि +अनुभूतिम्। अलभत- डुलभष् प्राप्तौ आ प लङ् प्र पु ए व।

**“रत्नाकरो नाम निषादोऽहम्। पथिकानां धनानि अवश्यञ्चेत् प्राणान् चापहृत्य कुटुम्बं पोषयामि ” सः प्रत्यवदत्।**

**“एवं वा?, पतिधर्म एव कुटुम्बपालनम्।किन्तु पथिकानां धनप्राणापहरणं किं न पापाय? अस्य पापस्य तव कलत्रपुत्रादयः फलभाजः किम्?” मुनिरपृच्छत्। “तदहं न जाने ” इति निषादेन उक्ते “एवं चेत् तान् पृष्ट्वागच्छतु, तावत्कालम् अत्रैव तिष्ठामः ” इति मुनिरवदत्।**

धनप्राणापहरणं किं न पापाय ?

---

**व्याख्या**

निषादोऽहम् - निषादः + अहम्, चापहृत्य - च + अपहृत्य, पथिकः अध्वनीनो अध्वगो अध्वन्यः पान्थः पथिकः। अपहृत्य- अप पूर्वक हृञ् धातोः ल्यबन्तमव्ययम्। अवदत् - वद व्यक्तायां वाचि लङ् प प प्र पु ए व। पत्युः धर्मः पतिधर्मः । धनानां प्राणानां च अपहरणं धनप्राणापहरणम्। पापम् - अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम्। कलत्रम् - भार्या जायाऽथ पुम्भूम्नि दाराः स्यात्तु कुटुम्बिनी। मुनिरपृच्छत् - मुनिः + अपृच्छत्। जाने - ज्ञा अवबोधने आ प लट् उ पु ए व। जाने जानीवहे जानीमहे। उभयपदित्वात् - जानामि जानीवः जानीमः। पृष्ट्वागच्छतु - पृष्ट्वा + आगच्छतु प्रच्छि धातोः क्त्वान्तमव्ययम्। आगच्छतु - आङ् उपसर्गपुर्वक गम्लृ गतौ लोट् प प प्र पु ए व। अत्रैव - अत्र + एव।

स्वेनैव - स्वेन + एव । भोक्तव्यम् - अनुभवितव्यम्। नेतरैः - न + इतरैः। निशम्य - नि पूर्वक शमु उपरमे धातोः ल्यबन्तमव्ययम्। खिन्नः -खेदयुक्तः। निपत्य - नि पूर्वक पत्लृ

**स्वेन कृतस्य कर्मणः फलं स्वेनैव भोक्तव्यं नेतरैः इति भार्यादीनां प्रतिवचनं निशम्य निषादः नितरां खिन्नोऽभवत्। पश्चात्तापविवशः सः प्रत्यागत्य मुनेः पादयोः निपत्य क्षमामयाचत। तं राममन्त्रोच्चारणाय संप्रेर्य ते मुनयः अगच्छन्।**

"वाल्मीके उत्तिष्ठ सिद्धोऽसि"

**अतीतेषु बहुषु संवत्सरेषु तेनैव मार्गेण प्रत्यागताः ते महर्षयः वनमध्यात् मधुरमनोहरं राममन्त्रमाकर्ण्य विस्मिताः तस्थुः। मन्त्रध्वनेः प्रभवस्थानम् एकं वल्मीकमिति ज्ञात्वा ते ऋषयस्तदभञ्जयन्। तदा अतितेजस्विनं कञ्चन मुनिश्रेष्ठम् अपश्यन्। तदा ते "वाल्मीके, उत्तिष्ठ सिद्धोऽसि" इत्यवदन्। निषादत्वात् ऋषित्वं प्राप्तस्य तस्य पुरतः ऋषयः साष्टाङ्गं प्राणमन्।**

---

**व्याख्या**

धातुः ल्यबन्तमव्ययम्। अयाचत - टुयाचृ याच् आयाम् आ प लङ् प्र पु ए व। सम्प्रेर्य - सम् प्र इत्युपसर्गपूर्वक ईर् गतौ ल्यबन्तमव्ययम्। अगच्छन् - गम्लृ गतौ प लङ् प्र पु ब व। तस्थुः - ष्ठा गतिनिवृत्तौ लिट् प प्र पु ब व। तस्थौ तस्थतुः तस्थुः। प्रभवः - उद्भवः। ज्ञात्वा - ज्ञा धातुः क्त्वान्तमव्ययम्।

अतीतेषु बहुषु संवत्सरेषु- यदा अतीताः बहवः संवत्सराः तदा (सति सप्तमी)। अभञ्जयन् - भञ्ज् धातोः लङ् प प प्र पु ब व। उत्तिष्ठ -उद् पूर्वक ष्ठा गतिनिवृत्तौ लोट् प प म ए व। सिद्धोऽसि- सिद्धः + असि। साष्टाङ्गप्रणामम् - करौ, जानू, अंसौ, उरः, फालः इत्येतैः अष्टैरङ्गैः भूस्पर्शनं करणीयम्। प्राणमन् - प्र पूर्वक णम् प्रह्वत्ते शब्दे लङ् प प प्र पु ब व।

**अथ सः वाल्मीकिः तमसानद्याः तीरे आश्रमे वासम् आरभत। तत्रैकदा क्रौञ्चमिथुनस्य पुंसः हन्तारं निषादं, "त्वं शाश्वतीं प्रतिष्ठां मा गमः" इति शशाप। ततः ब्रह्मदेवस्य निदेशानुसारं रामायणं रचयामास।**

**कूजन्तं राम रामेति मधुरं मधुराक्षरम्।**
**आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम्।।**

शाश्वतीं प्रतिष्ठां मा गमः

---

मा गमः- माङ् योगे लुङ् , अडागमनिषेधश्च ।

## पठनप्रवर्तनानि

- कथां पठित्वा कक्ष्यायाम् अवतारयतु।
  श्रद्धेयांशाः - नूतनपदचयनम् अर्थनिर्धारणञ्च।
  स्वकीये निघण्टौ यथास्थानं नूतनपदानां सन्निवेशः।
  सन्धियुक्तपदचयनं विश्लेषणञ्च।
  समस्तपदचयनं विग्रहवाक्यलेखनञ्च।
  कथायाः भावात्मकावतरणम्।
- अधो निर्दिष्टान् कथास्तम्भान् पाठभागानुसारं क्रमीकुरुत।
  क) वत्सेति सम्बोधनया निषादस्य मनः आर्द्रमभवत्।
  ख) भार्यायाः प्रतिवचनं निशम्य खिन्नोऽभवत्।
  ग) खड्गं प्रसार्य कश्चन निषादः आपतत्।
  घ) पश्चात्तापविवशः मुनीनां पुरतः अतिष्ठत्।
  ङ) पापफलं कलत्रपुत्रादयः अनुभवन्ति वा? इति मुनिरवदत्।
- निषादेन स्वगृहं गत्वा कलत्रं प्रति किं किं कथितं स्यात् ।तस्याः प्रतिवचनमपि सम्भाव्य लिखत।

- पाठभागानुसारं वाल्मीकेः कथां रामायणोत्पत्तिञ्च अधिकृत्य स्ववाक्यैः टिप्पणीं लिखत।
- पाठभागात् प्रथमाद्वितीयाविभक्त्यन्तपदानि विविच्य पट्टिकां कुरुत।

| उदा - | प्रथमा | द्वितीया |
|---|---|---|
| | सप्तर्षयः | प्राणान् |

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिक्तया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | कथा अवतारिता | | १/२/३/४ | |
| २ | कथास्तम्भाः क्रमीकृताः | | १/२/३/४ | |
| ३ | सम्भाव्य लिखितः | | १/२/३/४ | |
| ४ | टिप्पणी लिखिता | | १/२/३/४ | |
| ५ | पट्टिका कृता | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# १.३ पुरतो भ्रम लोकचक्र

**पठनाधिगमाः**

- काव्यम् आलपति।
- केरलीयसंस्कृतकृतीनां पट्टिकां करोति।
- गद्यक्रमं लिखति।
- आस्वादनटीकां लिखति।
- पद्यस्य आशयं लिखति।
- काव्यं कविञ्चाधिकृत्य टिप्पणीं लिखति।
- संबोधनप्रथमारूपाणि क्रोडीकरोति।

**आधुनिककैरलीकाव्येषु प्रथितं प्रमुखञ्च भवति 'चिन्ताविष्टयाय सीता'नामकं खण्डकाव्यम्। आधुनिके कवित्रये अन्यतमेन एन्. कुमारनाशान् महोदयेन विरचितोऽयं काव्यतल्लजः प्रतिपाद्यविषयेण प्रतिपादनशैल्या च सहृदयानां पीयूषायते।**

**रामायणे श्रीरामाभिषेकानन्तरमश्वमेधावसरे रामस्य समीपं वाल्मीकिना सह लवकुशौ सम्प्रेष्य सीता आश्रमवाटिकायामुपाविशत्। तदा तस्याः हृदयं चिन्तामथितं बभूव। ताः चिन्ताः खण्डकाव्येऽस्मिन् प्रपञ्चिताः।**

**काव्यस्यास्य संस्कृतानुवादः सीताविचारलहरीनामकः श्रीमता एन्.गोपालपिल्लामहोदयेन निर्व्यूढोऽस्ति। अस्य अन्तिमभागस्थाः केचन श्लोकाः अत्र समाकलिताः। भूमौ स्वकीयं जन्म सफलं जातमिति निरूप्य विलयप्राप्त्यर्थम् उद्यतायाः सीतादेव्याः आमन्त्रणवचांसि इमानि।**

| |
|---|
| पुरतो भ्रम लोकचक्र |

**विशिखा! निशिता विरम्यतां**
**क्षतमेयात् स्तिमितं न मे मनः।**
**पुरतो भ्रम लोकचक्र! मां**
**त्यज सीतामिह तां हतामहो।।१।।**

| **अन्वयः** | **अर्थः** |
|---|---|
| हे निशिताः | हे तीक्ष्णाः |
| विशिखाः | शराः |
| विरम्यताम् | प्रतिनिवृत्यताम् |
| स्तिमितम् | जडीभूतम् |
| मे | मम |
| मनः | अन्तः करणम् |
| क्षतं | व्रणितम् |
| न एयात् | न प्राप्नुयात् |
| (हे) लोकचक्र | हे प्रपञ्चराशे |
| इह | अत्र |
| पुरतः | पुरोभागे |
| भ्रम | भ्रमणं कुरु |
| हताम् | मृताम् (मृततुल्यामिति यावत्) |
| ताम् | तादृशीम् |
| सीतां माम् | सीतानाम्नीं माम् |
| अहो | हन्त |
| त्यज। | उपेक्षस्व। |

**वृत्तम्** वियोगिनी।

**तात्पर्यार्थः**

सीतया अनुभूतपूर्वाणि निरन्तरदुःखानि उद्दिश्य तानि प्रति सा वदति - हे तीक्ष्णशराः भवन्तः प्रतिनिवर्तन्ताम्। इतः परं मां क्लेशयितुं भवन्तः न प्रभवन्ति। कठिनानि दुःखानि अनुभूय मम मनसः जडता ( विकाररहिता अवस्था ) सञ्जाता। तादृशं मनः पुनः दुःखेन क्षतिं न प्राप्नुयात्। एवं मृततुल्यां मां नेतुं लोकचक्रेण प्रयत्नः न कार्यः। सीतां तत्रैव त्यक्त्वा लोकचक्रः (कालः) पुरोगामी भवतु इत्याशयः।

**व्याख्या**

विशिखा - पृषत्कबाणविशिखाअजिह्मगखगाशुगाः। कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः - इत्यमरः। एयात् - आङ् उपसर्गपूर्वक इण् गतौ विधिलिङ् प प प्र पु ए व। एयात् एयाताम् एयुः। त्यज - त्यज हानौ लोट् प प म पु ए व। त्यज/त्यजतात् त्यजतम् त्यजत। विरम्यताम्- वि पूर्वक रमु क्रीडायां भावे लोट् प्र पु ए व। हे विशिखाः भवद्भिः विरम्यताम् - भावे प्रयोगः ( रम् धातोः अकर्मकत्वात् )। हे विशिखाः भवन्तः विरमन्तु - कर्तरि प्रयोगः।

**नहि देहिनि शोभनं भवे-**
**च्चरितार्थे सति जीवितं पुनः।**
**सुतरां नटने समापिते**
**स च रङ्गाद्विरमेत् कुशीलवः।।२।।**

नटने सुतरां
समापिते

**पदच्छेदः** भवेच्चरितार्थे- भवेत् + चरितार्थे। रङ्गाद्विरमेत् - रङ्गात् + विरमेत्।

| अन्वयः | अर्थः |
|---|---|
| देहिनि | शरीरिणि |
| चरितार्थे सति | कृतकृत्ये सति |
| पुनः | भूयः |
| जीवितम् | जीवनम् |
| नहि शोभनम् | नहि उचितम् |
| भवेत् | भवेत् |
| नटने | अभिनये |
| सुतराम् | अतितराम् |
| समापिते सति | अवसिते सति |
| स कुशीलवः च | स नटः च |
| रङ्गात् | वेदिकायाः |
| विरमेत्। | प्रतिनिवर्तेत। |

**तात्पर्यार्थः** कर्मफलानि सर्वाणि अनुभूय कृतकृत्या या भवति तस्याः (सीतायाः) पुनः जीवनेन किमपि न प्रयोजनम्। यथा कश्चन नटः स्वकीयं नटनं सम्यक् समाप्य पुनः वेदिकायां स्थातुं न अर्हति तथा इत्याशयः। पूर्वजन्मनि कृतानां कर्मणां फलानि उपभोक्तुमेव जीवात्मा शरीरं धरति। अतः तदुपभोगानन्तरं शरीरधारणं नोचितम् इति आशयं कुशीलवदृष्टान्तेन समर्थयति।

**व्याख्या** देहिनि - देहः अस्य अस्ति इति देही तस्मिन्। विरमेत् -वि पूर्वक रमु क्रीडायाम् विधि लिङ् प प प्र पु ए व। भवेत् - भू सत्तायां

विधिलिङ् प प प्र पु ए व। देहिनि चरितार्थे सति - यदा देही चरितार्थः तदा। नटने समापिते सति - यदा नटनं समापितं तदा। कुशीलवः - शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः। भरत इत्यपि नटाः चारणास्तु कुशीलवाः - इत्यमरः।

**इयमस्तु नतिर्ममान्तिमा**
**दिनसाम्राज्यपते! दिवस्पते!।**
**कनकांशुशरौघधारिणे**
**भवते दुष्प्रसहप्रदीप्तये।।३।।**

अन्तिमा नतिः अस्तु

**पदच्छेदः**

नतिर्ममान्तिमा - नतिः + मम + अन्तिमा।

| **अन्वयः** | **अर्थः** |
|---|---|
| हे दिनसाम्राज्यपते | हे दिनचक्रवर्तिन् (सूर्य) |
| दिवस्पते | आकाशपते |
| दुष्प्रसहप्रदीप्तये | अतिशक्तप्रभाववते |
| कनकांशुशरौघधारिणे | स्वर्णमयरश्मिसमूहधारिणे |
| भवते | सूर्याय |
| मम | मदीयः |
| अन्तिमा | अन्त्यः |
| नतिः | प्रणामः |
| अस्तु। | भवतु। |

**तात्पर्यार्थः**

स्वजीवितं कृतकृत्यमिति निश्चित्य स्वयं प्राणान् त्यक्तुम् उद्यता सीता इष्टदेवताः प्रणमति। प्रथमं तावत् स्वपतिकुलदेवतां

सूर्यं उद्दिश्य इयम् उक्तिः। अत्र सूर्यदेवस्य विशेषणानि सूर्यवंशजे राजनि दशरथेऽपि सङ्गतानि। एवं सीता सूर्यदेवं स्वश्वशुरं च युगपद् एव नमति।

**व्याख्या**

**सूर्यपक्षे** - दिनसाम्राज्यपते - दिनम् एव साम्राज्यं दिनसाम्राज्यं तस्य पतिः दिनसाम्राज्यपतिः तत्सम्बुद्धौ दिनसाम्राज्यपते । दिवस्पते - दिवः (आकाशस्य) पतिः दिवस्पतिः तत्सम्बुद्धौ दिवस्पते। दुष्प्रसहप्रदीप्तये - दुःखेन प्रसोढुं शक्या प्रदीप्तिः (आतपः) यस्य तस्मै दुष्प्रसहप्रदीप्तये । कनकांशुशरौघधारिणे - कनकसदृशाः अंशवः (रश्मयः) एव शराः, तादृशशराणाम् ओघं धरन् तस्मै कनकांशुशरौघधारिणे। भवते नतिः इत्यस्य भवन्तं तोषयितुं नतिः इत्यर्थः कल्पनीयः।

**दशरथपक्षे** - दिनमिव ( विपुलं प्रकाशमानञ्च ) साम्राज्यं तस्य पतिः दिनसाम्राज्यपतिः तत्सम्बुद्धौ दिनसाम्राज्यपते। दिवः (स्वर्गस्य - स्वर्गकल्पराज्यस्य) पतिः दिवस्पतिः तत्सम्बुद्धौ दिवस्पते। दुःखेन प्रसोढुं (मर्षितुम्) शक्या प्रदीप्तिः (प्रतापः) यस्य तस्मै दुष्प्रसहप्रदीप्तये। कनकांशवः (सुवर्णरश्मयः) इव वेगवतां शराणाम् ओघं धरन् तस्मै कनकांशुशरौघधारिणे।

मृगाङ्क !
ते नमः

**सुसिताम्बर! वन्द्य! वृद्ध! भो!**
**बिसिनीतन्तुमरीचिकैशिक!।**
**लसितस्मित! चारुचन्द्रिका -**
**भसितस्नात! मृगाङ्क! ते नमः ।। ४।।**

| **अन्वयः** | **अर्थः (चन्द्रपक्षे)** |
|---|---|
| हे सुसिताम्बर | हे शुभ्राकाशस्थित |

| | |
|---|---|
| वन्द्य | वन्दनीय |
| वृद्ध | आकारेण समृद्ध (पूर्ण) |
| भो | हे |
| बिसिनीतन्तुमरीचिकैशिक | मृणालसूत्रवत् किरणयुक्त |
| लसितस्मित | विलासयुक्तस्मितकारिन् |
| चारुचन्द्रिकाभसितस्नात | भस्मसदृश्यां चन्द्रिकायां स्नात |
| मृगाङ्क | मृगचिह्नाङ्कित |
| ते नमः। | भवते नमः। |

### तात्पर्यार्थः

चन्द्रं प्रति प्रणामरूपया अनया उक्त्या स्वपितरं जनकमपि प्रणमति सीता।

### व्याख्या

**चन्द्रपक्षे** - सुसिताम्बर - सुसितम् (अतीवशुक्लम्) अम्बरम् (आकाशम्) यस्य तत्सम्बुद्धौ। बिसिनीतन्तुमरीचिकैशिक- बिसिनीतन्तुसदृशाः मरीचयः एव कैशिकं (केशसमूहः) यस्य तत्सम्बुद्धौ। लसितस्मित - लसितं स्मितं यस्य तत्सम्बुद्धौ। चारुचन्द्रिकाभसितस्नात -चारुचन्द्रिका एव भसितं (भस्म) तस्मिन् स्नातः तत्सम्बुद्धौ। चन्द्रिका - चन्द्रिका कौमुदी ज्योत्स्ना इत्यमरः। मृगाङ्क - मृगः (शशः) अङ्के यस्य तत्सम्बुद्धौ। ते नमः - नमश्शब्दयोगे ते(तुभ्यम्) इति चतुर्थी।

**जनकपक्षे** - सुसिताम्बर - सुसितम् (शुभ्रम्) अम्बरम् (वस्त्रम्) यस्य तत्सम्बुद्धौ। बिसिनीतन्तुमरीचिकैशिक - बिसिनीतन्तुसदृशाः मरीचयः इव कैशिकं यस्य तत्सम्बुद्धौ। चारुचन्द्रिकाभसितस्नात - चारुचन्द्रिका इव भसितं (भस्म) तस्मिन् स्नातः तत्सम्बुद्धौ। मृगाङ्क - मृगः अङ्के यस्य सः मृगाङ्कः तत्सम्बुद्धौ।

काभिः तमः विदार्यते ?

**निजगाः प्रविचार्य दूरतो**
**गहनं सन्तमसं विदार्य याः।**
**स्वमहांस्युपदर्शयन्ति नः**
**शुभताराः भवतीर्नमामि ताः ।। ५।।**

**पदच्छेदः**

स्वमहांस्युपदर्शयन्ति - स्वमहांसि + उपदर्शयन्ति।
भवतीर्नमामि - भवतीः + नमामि।

| अन्वयः | अर्थः |
|---|---|
| याः शुभताराः | याः शुभनक्षत्राणि (तपस्विन्यः वा) |
| निजगाः | स्वकीयाः रश्मयः (वाचः वा) |
| दूरतः | बहुदूरं यावत् |
| प्रविचार्य | प्रसार्य |
| गहनम् | गाढम् |
| सन्तमसम् | घनान्धकारम् |
| विदार्य | नाशयित्वा |
| स्वमहांसि | स्वकीयाः प्रभाः (महत्वं वा) |
| नः | अस्मान् |
| उपदर्शयन्ति | प्रदर्शयन्ति |
| ताः | तादृशीः |
| भवतीः | ताराः |
| अहं नमामि। | अहं नमस्करोमि। |

**तात्पर्यार्थः**

याः शुभताराः स्वकीयान् रश्मीन् बहुदूरं प्रसार्य घनान्धकारं नाशयित्वा स्वप्रभाः प्रदर्शयन्ति तादृशीः ताराः अहं नमामि। अत्र नक्षत्राणां प्रणामवचनेन आश्रमस्थाः तपस्विन्यः अपि प्रणम्यन्ते । यथा - या

आश्रमताराः (तपस्विन्यः) स्वकीयाः वाचः बहुदूरं प्रसार्य अज्ञानरूपम् अन्धकारं नाशयित्वा स्वमहिमानं प्रदर्शयन्ति ताः अहं (सीता) नमामि।

**व्याख्या**

निजगाः - निजाश्च अमूः गावः च निजगावः ताः। गोशब्दस्य स्वर्ग-शर-धेनु-वाक्-वज्र-दिक्-नेत्र-रश्मि-भूमि-जलाद्यर्थाः विद्यन्ते। ओकारान्तः शब्दोऽयं पुंसि स्त्रियां च प्रयुज्यते। सन्तमसम् - सम्/अव/अन्ध पूर्वकस्य तमस् शब्दस्य अकारान्तत्वम्। प्रविचार्य - प्र वि पूर्वक चर् गत्यर्थे भक्षणे च णिचि ल्यप्। उपदर्शयन्ति - उप पूर्वक दृशिर् प्रेक्षणे णिचि प प प्र पु ब व।

**इह सायमुषस्सु चान्वहं**
**वयमाना शबलांशुकानि या।**
**छदतेऽम्बरवेश्मतोरणं**
**प्रियसन्ध्ये! भवतीं नमामि ताम्।।६।।**

प्रियसन्ध्ये!
भवतीं नमामि

**पदच्छेदः**

चान्वहम् - च + अन्वहम्।

छदतेऽम्बरवेश्मतोरणं - छदते + अम्बरवेश्मतोरणम्।

| अन्वयः | अर्थः |
|---|---|
| या | या सन्ध्या |
| इह | अत्र |
| अन्वहम् | प्रतिदिनम् |
| सायम् उषस्सु च | सायाह्ने प्रभाते च |
| शबलांशुकानि | नानावर्णान् रश्मीन् (वस्त्राणि च) |
| वयमाना | रचयन्ती |
| अम्बरवेश्मतोरणम् | आकाशगृहतोरणम् |
| छदते | आच्छादयति |
| तां भवतीं सन्ध्याम् | तादृशीं सन्ध्याम् |
| अहं नमामि। | अहं नौमि। |

**तात्पर्यार्थः**

या सन्ध्या प्रतिदिनं सायं प्रातश्च वर्णशबलान् रश्मीन् रचयन्ती आत्मनः आकाशगृहं तोरणालङ्कृतं करोति तादृशीं सन्ध्यां प्रणमामि। अत्र सन्ध्यादेवीं प्रति प्रणामवचने आश्रमान्तरिक्षस्य साम्यं व्यज्यते। आश्रमपक्षे मुनीनां काषायवस्त्राणि प्रतिदिनं सायं प्रातश्च आश्रमोपान्तस्य तोरणम् इव आचरन्ति।

**व्याख्या**

शबलांशुकानि - शबलानि च तानि अंशुकानि। अम्बरवेश्मतोरणम् - अम्बरमेव वेश्म अम्बरवेश्म तस्य तोरणम्। अन्वहम् - अहनि अहनि । वयमाना - वेञ् तन्तुसन्ताने इत्यस्य शानजन्तः। छदते - छद अपवारणे लट् आ प प्र पु ए व। छदते छदेते छदन्ते।

**वियोगः न सम्भवेत्**

**अथवातिमनोहराद्बहि-**
**र्जगतो मे विरहो न सम्भवेत्।**
**अवनौ च तनुर्मनोरथो**
**मम चैषां सुषमासु लेष्यते।। ७।।**

**पदच्छेदः**

अथवातिमनोहरात् - अथवा + अतिमनोहरात्। तनुर्मनोरथः - तनुः + मनोरथः। चैषाम् - च + एषाम्। बहिर्जगतः - बहिः + जगतः। विरहो न - विरहः + न।

| **अन्वयः** | **अर्थः** |
|---|---|
| अथवा | अथवा |
| अतिमनोहरात् | अतीवसुन्दरात् |
| जगतः बहिः | अस्मात् लोकात् बहिः |
| मे | मम |
| विरहः | वियोगः |

| | |
|---|---|
| न सम्भवेत् | न भवितुं युक्तम् |
| मम तनुः | मम शरीरम् |
| मनोरथः च | इच्छा च |
| अवनौ | भुवि |
| एषाम् | भूमिजानाम् |
| सुषमासु | सौन्दर्येषु |
| लेष्यते | विलयं प्राप्स्यति। |

**तात्पर्यार्थः**

अन्यथा चिन्त्यते चेत् अतिमनोहरात् अस्मात् लोकात् मम वियोगो नार्हति। मम तनुः मनोरथश्च अस्मिन् लोके विद्यमानेषु सौन्दर्येषु विलयं प्राप्स्यतः। मरणात् परं जीविनां शरीराणि पञ्चभूतेषु विलयं प्राप्नुवन्ति। अतः मरणानन्तरमपि लोकादस्मात् पूर्णवियोगो न सम्भवति इत्याशयः।

**व्याख्या**

लेष्यते - लीङ् श्लेषणे लृट् आ प प्र पु ए व। जगतः बहिः - बहिश्शब्दयोगे जगतः इति पञ्चमी। मनोरथः - इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः - इत्यमरः।

**जनयित्रि! विलोकयाम्यहं**
**भवतीं मां दधतीं सुवत्सलाम्।**
**निजमञ्चभुवं समुज्ज्वला-**
**मुपयान्तीमनघे! वसुन्धरे ! ।। ८ ।।**

पञ्चभूतांशाः
तत्तद्भूतेषु
लीयन्ते

**पदच्छेदः**

विलोकयाम्यहम् - विलोकयामि + अहम्।

| **अन्वयः** | **अर्थः** |
|---|---|
| हे वसुन्धरे | हे भूमिदेवि |
| अनघे | पापरहिते (परिशुद्धे) |
| जनयित्रि ! | मातः ! |

| | |
|---|---|
| अहम् | अहम् (सीता) |
| सुवत्सलाम् | अपत्यप्रणयिनीम् |
| समुज्ज्वलाम् | अत्यन्तं शोभमानाम् |
| भवतीम् | भवतीम् (भूमीदेवीम्) |
| मां दधतीम् | मां (सीतां) धारयन्तीम् |
| निजमञ्चभुवम् | स्वकीयम् आस्थानमञ्चम् (विश्रमस्थानम्) |
| उपयान्तीम् | उपगच्छन्तीम् |
| विलोकयामि। | पश्यामि। |

**तात्पर्यार्थः**

हे मातः! अपत्यप्रणयिनि! भूमिदेवि! माता पुत्रिकाम् आदाय इव मां स्वीकृत्य भवत्याः मञ्चं प्रति नयन्तीम् अहम् उत्पश्यामि। भूमिदेवी तां स्वकीयं मञ्चं (शवमञ्चं) नयतीति सीता सम्भावयति। स्वच्छन्दमृत्यूनां योगिवर्याणां समाधिरीतिः अत्र सूच्यते। प्राणविलयानन्तरं शरीरघटकाः पञ्चभूतांशाः तत्तद्भूतेषु लीयन्ते इति विश्वासः।

**व्याख्या**

वसुन्धरे - वसून् धरतीति वसुन्धरा तत्सम्बुद्धौ। अनघे - न अघमस्यास्तीति अनघा तत्सम्बुद्धौ। निजमञ्चभुवम् - निजः मञ्च एव भूः ताम्। मञ्चः - पल्यङ्कः, पर्यङ्कः, खट्वा। दधतीम् - डुधाञ् धारणपोषणयोः इत्यस्य शत्रन्ते स्त्री। दधती दधत्यौ दधत्यः।

**पठनप्रवर्तनानि**

- ताललयसमन्वितं श्लोकम् आलपत।
- श्लोकानाम् आशयं स्ववाक्यैः संगृह्य लिखत।

- इष्टतमं श्लोकं चित्वा टिप्पणीं लिखत।
- अत्र सीतायाः चिन्ताः स्त्रीपक्षे दृष्ट्वा चर्चां कुरुत। चर्चा सूचकाः - समूहे स्त्रीणां स्थानम्, स्त्रीणां चिन्तारीतिः, दृश्यमानाः आचारक्रमाः, स्ववातावरणं प्रति तस्याः आबद्धता।
- कैरलीतः संस्कृतानुवादसन्दर्भे दृश्यमाने भाषासाम्यवैषम्ये इति विषये पुरतो भ्रम लोकचक्र इति काव्यभागमाधारीकृत्य संगोष्ठीं चालयत।
- सम्बोधनप्रथमायाः उदाहरणानि पाठभागात् समाहृत्य लिखत।

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | श्लोकाः आलपिताः | | १/२/३/४ | |
| २ | आशयः लिखितः | | १/२/३/४ | |
| ३ | टिप्पणी लिखिता | | १/२/३/४ | |
| ४ | सीतायाः विचारधाराः स्ववाक्यैः लिखिताः | | १/२/३/४ | |
| ५ | संगोष्ठी चालिता | | १/२/३/४ | |
| ६ | संबोधनप्रथमारूपाणि समाहृतानि | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

संगच्छध्वं संवदध्वं संवो मनांसि जानताम्।
देवा भागं यथापूर्वे संजानाना उपासते।।

# मौलिकम्



# २.१ शब्दाह्वयं ज्योतिः

**पठनाधिगमाः**

- माहेश्वरसूत्राणि लिखति।
- ग्रन्थमाचार्यञ्च अधिकृत्य टीकां लिखति।
- प्रत्याहारान्तर्गतान् वर्णान् चित्वा लिखति ।

सः अतीव दुःखितः

**पुरा तक्षशिला नाम काचित् सर्वकलाशाला आसीत्। तत्र महान् आचार्यः उपवर्षः शिष्यान् अध्यापयन् आसीत्। शिष्येष्वन्यतमः दाक्षीपुत्रः पाणिनिः। सर्वे सतीर्थ्याः "मूढधीः पाणिनिः, मूढधीः पाणिनिः" इत्येवं परामृश्य पाणिनिं परिहसन्ति स्म। अतीव दुःखितः स एवमचिन्तयत् -"कुतः किमपि नावगच्छामि ? बहु प्रयत्नं कृत्वापि किमपि फलं न लब्धम्।**

**व्याख्या**

शिष्येष्वन्यतमः - शिष्येषु + अन्यतमः। इत्येवम् - इति + एवम्। आहूय- आ पूर्वक ह्वेञ् आह्वाने ल्यवन्तम्। परिहसन्ति स्म - पर्यहसत। स्म योगे लटः भूतकालार्थः। अचिन्तयत्- चिति व्यापारकर्मणोः लङ् प्र पु ए व। नावगच्छामि - न + अवगच्छामि। कृत्वापि - कृत्वा + अपि। कृत्वा - डुकृञ् करणे क्त्वान्तमव्ययम्। लब्धम् -डुलभष् प्राप्तौ क्तप्रत्ययान्तः। अन्य इव - अन्ये + इव तीर्थमागतोऽस्मि - तीर्थम् आगतः + अस्मि। तीर्थम् - गुरुकुलम्। कार्याण्यवगच्छन्ति - कार्याणि + अवगच्छन्ति। ददति - डुदाञ् दाने लट् प प्र पु ब व। ददाति दत्तः ददति ।

**अहमपि दूराद् अन्य इव पठनार्थम् एतत् तीर्थमागतोऽस्मि। इतरे तु पाठितानि कार्याण्यवगच्छन्ति प्रश्नानामुत्तराणि ददति च। किमहं मूढस्स्याम्? किं कर्तव्यम्? कोऽपि मार्गो न दृश्यते? गृहं प्रतिगच्छामि" एवं विचिन्त्य सः कमपि किमपि नोक्त्वा ततः गृहमगच्छत्।**

**कतिपयदिनानन्तरं सः मात्रा दाक्ष्या साकं जलमाहर्तुं नदीमगच्छत्। दैनिकक्रम इव माता कुम्भे जलं पूरयित्वा तटगते शिलातले न्यस्यति स्म। सा पुत्रमेवम् अवदत् - " पुत्र, निरन्तरं घटविन्यासेन तदधोभागस्य चिह्नं शिलोपरि न पश्यसि किम् ? एवं शिलायामपि परिणामो भवति, तथापि किं नु खलु त्वयि न? कष्टेयं दशा। "**

**प्रश्नोऽयं तस्मिन् चिन्ताधाराः अजनयत्। एवं स विद्यालाभार्थं तपश्चरितुं निर्णिनाय।**

शिलायामपि परिणामो भवति

---

**व्याख्या**

मूढस्स्याम् - मूढः + स्याम्। स्याम् - अस् भुवि वि लिङ् उ पु ए व। कोऽपि - कः + अपि। मार्गो न - मार्गः + न। दृश्यते - दृशिर् प्रेक्षणे लट् कर्मणि प्र पु ए व। प्रतिगच्छामि - निवृत्य गच्छामि। विचिन्त्य - वि पूर्वक चिति स्मृत्यां ल्यबन्तमव्ययम्। नोक्त्वा - न + उक्त्वा। उक्त्वा वद व्यक्तायां वाचि क्त्वान्तमव्ययम्। मात्रा साकं - साकमित्यव्ययस्य योगे मात्रा इति तृतीया विभक्तिः। साकं- सह। आहर्तुं - आ हृञ् हरणे तुमुन्नन्तमव्ययम्। दैनिकक्रम इव - दैनिकक्रमः + इव। दिने भवः दैनिकः दिनसम्बन्धमित्यर्थः। पूरयित्वा - पूञ् प्रपूरणे क्त्वान्तमव्ययम्। अवदत् - वद व्यक्तायां वाचि लङ् प्र पु ए व। कष्टेयं - कष्टा + इयम्। प्रश्नोऽयं - प्रश्नः + अयम्। तपश्चरितुं - तपः + चरितुम् ।

महादेवं प्रत्यक्षीचकार

**कठिनेन तपसा नटराजं महादेवं प्रत्यक्षीचकार। नृत्तावसाने नवपञ्चवारं ध्वनितं ढक्कानिनादं शब्दब्रह्मत्वेन विज्ञाय सः माहेश्वरसूत्ररूपेण प्रत्यभिजानाति स्म। तदुक्तं नन्दिकेश्वरेण स्वकीयकारिकायाम् -**

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।।**

माहेश्वरसूत्राणि

**अ इ उ ण्। १**
**ऋ ऌ क्। २**
**ए ओ ङ्। ३**
**ऐ औ च्। ४**
**ह य व र ट्। ५**
**ल ण्। ६**
**ञ म ङ ण न म्। ७**

## व्याख्या

प्रत्यक्षीचकार - अप्रत्यक्षं प्रत्यक्षं सम्पद्यमानं चकार। ननाद - नादयामास। णद अव्यक्ते शब्दे लिट् प प प्र पु ए व। ननाद - नेदतुः - नेदुः। विमर्शे - विचार्य स्फुटीकरोमि।

अन्वयः- सनकादिसिद्धान् उद्धर्तुकामः नटराजराजो नृत्तावसाने ढक्कां नवपञ्चवारं ननाद। एतत् शिवसूत्रजालं विमर्शे।

अ इ उ - शुद्धस्वराः।
ऋ ऌ - व्यञ्जनयुक्तस्वराः।
ए ओ ऐ औ - सन्ध्यक्षराणि।
य व र ल - अन्तस्थाः (स्वरव्यञ्जनयोः मध्ये उच्चारणम्)।
ञ म ङ ण न - अनुनासिकव्यञ्जनानि।
झ भ घ ढ ध - वर्गचतुर्थव्यञ्जनानि ।

**झ भ ञ्। ८**
**घ ढ ध ष्। ९**
**ज ब ग ड द श्। १०**
**ख फ छ ठ थ च ट त व्। ११**
**क प य्। १२**
**श ष स र्। १३**
**ह ल्। १४**

माहेश्वरसूत्राणि

**एवं पाणिनिः संस्कृतव्याकरणशास्त्रे नूतनां प्रणालीमुपास्थापयत्। सुघटितस्यास्य संस्कृतव्याकरणस्य मूलभूतानि भवन्ति एतानि माहेश्वरसूत्राणि। पाणिनिः संस्कृतव्याकरणस्य मुख्याचार्यश्चाभूत्। व्याक्रियन्ते अनेन शब्दा इति व्याकरणम्। व्याकरणमेव शब्दानुशासनम्। वैदिकसंस्कृतस्य तथा लौकिकसंस्कृतस्य च व्याकरणस्य एकत्र सन्निवेशात् पाणिनीयं महत्तरमभूत्। अष्टानाम् अध्यायानां समाहारादस्य ग्रन्थस्य नाम अष्टाध्यायीति च सिद्धम्।**

नूतनां प्रणालीम् उपास्थापयत्

---

**व्याख्या**

ज ब ग ड द - वर्गतृतीयव्यञ्जनानि ।

ख फ छ ठ थ - वर्गद्वितीयव्यञ्जनानि ।

च ट त क प - वर्गप्रथमव्यञ्जनानि ।

श ष स ह - ऊष्माणः (उच्चारणसमये ऊष्मा बहिस्स्फुरति)

आचार्यश्चाभूत् - आचार्यः + च + अभूत्। प्रणाली - सरणिः। व्याक्रियन्ते निष्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्। वि आङ् पूर्वक डुकृञ् धातोः करणार्थे ल्युट् प्रत्ययः। अनुशिष्यन्ते अपशब्देभ्यो विविच्य शब्दाः इति शब्दानुशासनम्। अद्य उपलभ्यमानाः व्याकरणग्रन्थाः त्रिधा विभक्ताः। ते लौकिकव्याकरणग्रन्थाः वैदिकव्याकरणग्रन्थाः लौकिक - वैदिकव्याकरणग्रन्थाश्च।

३९९५ सूत्राणि तत्र वर्तन्ते

**माहेश्वरसूत्राण्युपयुज्य पाणिनिना प्रत्याहाराः निर्मिताः। एतानुपयुज्य सूत्ररूपेण नियमाः तेन निबद्धाः। ३९९५ सूत्राणि तत्र वर्तन्ते।**

---

**व्याख्या**

माहेश्वरसूत्राण्युपयुज्य - माहेश्वरसूत्राणि + उपयुज्य। महेश्वरादागतानि माहेश्वराणि। माहेश्वराणि तानि सूत्राणि माहेश्वरसूत्राणि।

गणितशास्त्रवत् क्रमीकृत्य संगृह्य च पाणिनिना स्वग्रन्थे भाषासिद्धान्ताः निर्दिष्टाः। अमेरिक्कादेशीयेन भाषाशास्त्रज्ञेन ब्लूंफील्ड् महोदयेन एवमुक्तम् -'पाणिनीयं तु मनुष्यबुद्धेरेकं महत्तरं मूर्तरूपं भवती ति। एवं शब्दाह्वयेन ज्योतिषा शब्दप्रपञ्चं प्राकाशयत्।

**व्याकरणस्य प्रवृत्तिः**

अत्र माहेश्वरसूत्रैः प्रत्याहाराः निर्मातुं शक्यन्ते। प्रत्याह्रियन्ते वर्णाः अनेन इति प्रत्याहारः। लाघवेन वर्णानां प्रतिपादनार्थम् इमे प्रत्याहाराः। अण् इक् एच् अच् हश् हल् इत्यादयः प्रत्याहाराः। अच् इत्यत्र अकारादारभ्य औकारपर्यन्ताः वर्णाः। इक् इत्यत्र इकारादारभ्य लृकारपर्यन्ताः वर्णाः। जश् इत्यत्र जकारादारभ्य दकारपर्यन्ताः वर्णाः गृहीताः। एतादृशी भवति प्रत्याहाराणां प्रवृत्तिः। प्रत्येकं सूत्रान्ते दृष्टानि स्वररहितव्यञ्जनानि (ण् क् ङ् इत्यादयः) प्रत्याहारनिर्माणाय एव। तानि वर्णत्वेन न परिगण्यन्ते। अत्र सर्वेषु व्यञ्जनेषु अकार उच्चारणार्थः।

प्रत्याहारात् कथं व्याकरणशास्त्रप्रवृत्तिरिति यथा - इकोयणचि - इकः (इ उ ऋ लृ) स्थाने यण् ( य् व् र् ल् ) स्यात् अच् ( अ इ उ ऋ लृ ए ओ ऐ औ - सर्वाणि स्वराक्षराणि) परे स्थिते।

**लोके सर्वत्र विविधैः भाषाशास्त्रज्ञैः अत्यादरपूर्वमेव पाणिनीयप्रवृत्तिः परामृश्यते । अद्य विद्यमानेषु शब्दशास्त्रेषु एकं सम्पूर्णं व्याकरणं भवति पाणिनीयम्। एवं शब्दाह्वयं ज्योतिः प्रसार्य पाणिनिः भुवनतलगतमन्धकारमपाकरोत्।**

**सम्पूर्णं व्याकरणं भवति पाणिनीयम्।**

## व्याख्या

सूत्रे षष्ठीनिर्दिष्टस्य स्थाने आदेशः,सप्तमीनिर्दिष्टस्य तत्परे स्थिते इति चावगन्तव्यम्। एवम् अतिविस्तृतस्य संस्कृतव्याकरणस्य प्रवृत्तिः माहेश्वरसूत्रैः सङ्क्षेपेण विन्यस्ता। इ उ ऋ लृ एतेषां यथासंख्यं य् व् र् ल् इत्यादेशाः।

**इति उक्त्वा** इति स्थिते सन्धिकार्ये तकारोत्तरवर्तिः इकारः इक् भवति। तदनन्तरम् उ वर्तते तद् अच् एव। अतः इकः स्थाने यण् विधीयते। तालुस्थानीयत्वात् **इकारस्य** स्थाने **यकारः**। एवम् **इत् य् उक्त्वा** संयोज्य **इत्युक्त्वा** इति। अत्यधिकम् इत्यपि इत्येवं बह्वत्र इत्यादि उदाहरणान्तराणि।

अष्टाध्याय्याः वार्तिकम् कात्यायनेन रचितम्। वार्तिकानन्तरमेवात्र भाष्यस्य रचना इत्यतः महाभाष्यसंज्ञया व्यवह्रियते। अपि च बहूनां लोकन्यायानां संग्रहात् महाभाष्यमिति प्रथा समीचीना एव।

तथा चोक्तम्-

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।<br>
यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते।।

(काव्यादर्शः)

## पठनप्रवर्तनानि

- अधो दत्तानि माहेश्वरसूत्राणि क्रमीकुरुत।

  अ इ उ ण्। ऐ औ च्। झ भ ञ्। ह ल्।

  ख फ छ ठ थ च ट त व्। ऋ लृ क्। ल ण्।

  ह य व र ट्। श ष स र्। ए ओ ङ्।

  ज ब ग ड द श्। क प य्। ञ म ङ ण न म्।

  घ ढ ध ष्।

- अधो निर्दिष्टेषु प्रत्याहारेषु के के वर्णाः अन्तर्भवन्ति।

  अच्। अल्। हल्। इक्। यण्। एच्। जश्। अव्। लश्।

- माहेश्वरसूत्राणाम् उत्पत्तिमधिकृत्य पाठभागे प्रदत्तां कथां संगृह्य लिखत।

### स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम सं | पठनप्रवर्तनानि | भागिक्तया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | माहेश्वरसूत्राणि क्रमीकृतानि | | १/२/३/४ | |
| २ | प्रत्याहारान्तर्गताः वर्णाः विवेचिताः | | १/२/३/४ | |
| ३ | कथा संगृह्य लिखिता | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# २.२ शरीरमाद्यं खलु धर्मसाधनम्

**पठनाधिगमाः**

- उपन्यासं वाचयति।
- पदानि विवेचयति पदार्थं वदति च।
- दिनचर्यायाः प्राधान्यमधिकृत्य आयुर्वेदशास्त्रानुसारं टीकां लिखति।
- दिनचर्या सामाजिकाचारश्च इति विषये संगोष्ठ्यां भागं गृह्णाति।
- स्वदिनचर्यां लिखति।
- संख्यासमयवाचकपदानि नूतनसन्दर्भे प्रयुज्यते।

भारतीयचिकित्साशास्त्रस्य आयुर्वेद इति नाम। सत्त्वात्मसंयोगः आयुः। आयुषः वेदः आयुर्वेदः। अस्मिन् शास्त्रे चरकसंहिता-सुश्रुतसंहिताष्टाङ्गहृदयादयः अतिप्रसिद्धाः ग्रन्थाः उपलभ्यन्ते। तेषु उपलभ्यमानाः उपदेशाः आरोग्यपालनाय कल्पन्ते। तैः उपदेशैः मानवानां स्वस्थजीवितं तथा  राष्ट्रसमाजयोः निरामया सुस्थितिश्च सिद्ध्यति। पञ्चभूतात्मको भवति प्रपञ्चः। तस्य अनुकृतिरेव शरीरम्। तच्च नीरोगं भवेत्। त्रिदोषस्य समावस्था एव आरोग्यम्। आरोग्यपालनाय वाग्भटाचार्येण अष्टाङ्गहृदये उक्ताः आशयाः एवात्र सङ्क्षेपेण प्रतिपाद्यन्ते।

**आरोग्यपालने आत्मा मनश्शरीरेन्द्रियाणि च समग्रतया परिगण्यन्ते। शरीरारोग्याय शुचित्वाय च अनुवर्तनीयाः दैनिकाः आचाराः एव दिनचर्या। स्वास्थ्यं दिनचर्यामवलम्ब्य तिष्ठति। वाग्भटविरचिते अष्टाङ्गहृदये उक्तं 'ब्राह्मे मुहूर्ते उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः' इति। उत्थाय च शौचाद्यनन्तरं व्यायामो निर्दिष्टः। तदेवं लक्ष्यते "शरीरायासजननं कर्म व्यायाम" इति। तेन शरीरस्य लाघवं, कर्मोत्सुकता इत्येवमादयो गुणाः लभ्यन्ते। सः तु कालानुसारी शरीरानुसारी च कर्तव्यः।**

स्वास्थ्यं दिनचर्याम् अवलम्ब्य तिष्ठति

**स्वास्थ्यपालने शरीरशुद्धेः नितरां प्राधान्यमस्ति। तत्तु स्नानेन लभ्यते च। स्नानम् आयुष्याद्युपकारकं भवति। स्नाने अधः कायस्य(गलस्य अधः)परिषेकः उष्णजलेन,**

## व्याख्या

आयुर्जीवितकालो ना जीवातुर्जीवनौषधम् इत्यमरः । हितम् अहितं सुखं दुःखं चेति चतुष्प्रकारकं भवति आयुः। तस्य आयुषः हितम् अहितं मानं च यस्मिन् शास्त्रे उक्तं स आयुर्वेदः उच्यते। अनुकृतिरेव-अनुकृतिः + एव। स्वस्थः - स्वस्मिन् तिष्ठतीति। स्वस्थलक्षणं यथा -

समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ।।

पञ्चभूतानि - पृथ्व्यप्तेजोवाय्वाकाशानि। ब्राह्ममुहूर्तम् - सूर्योदयात् प्राक् नाडिकाचतुष्टयस्य पूर्वार्धकालः, ब्राह्मं - ज्ञानं। पठनपाठनादि कार्यार्थम् उपयुज्यमानं मुहूर्तम्। वायुः पित्तं कफश्चेति त्रयो दोषाः। अनुवर्तनीयाः - पालयितुं योग्याः। इत्यभिधीयन्ते - इति +अभिधीयन्ते। कर्मोत्सुकता - कर्मणि उत्सुकता। आयुषे हितम् आयुष्यम्। परिषेकः - परि सर्वतः सेकः(सेचनम्)।

**एवमुत्तमाङ्गस्य शीतजलेन च कर्तव्यः। रोगग्रस्तेषु रोगस्वभावानुसारं क्वचित् स्नानं विहितं क्वचिच्च निषिद्धम्। स्वास्थ्यपालने आहारस्यापि प्राधान्यमस्ति। आहारशुद्धेरेव शरीरस्य मनसः जीवितस्य च शुद्धिः सम्पद्यते ।आयुर्वेदोपदिष्टानि षड्रसोपयुक्तानि भोज्यानि स्वीकुर्युश्चेत् मानवाः अरोगाः भविष्यन्ति। अष्टाङ्गहृदये दिनचर्याध्याये स्वकीयदैनिकाचाराणामिव सामाजिकाचाराणामपि प्राधान्येन प्रतिपादनमुपलभ्यते। "धर्मपरो भव, आत्मवत् सर्वानपि पश्येत्, यथाकालं हितं मितं सत्यं च भाषेत, हितं मितञ्च भक्षयेत्, न वेगान् ईरयेद्बलात्, अकस्मात्सङ्गते सुहृदि पूर्वालापी स्यात्, पापकर्म वर्जनीयम् , सद्व्रतमनुपालनीयम्" इत्याद्युपदेशाः विद्यन्ते।**

स्वास्थ्यपालने शरीरशुद्धेः प्राधान्यमस्ति

---

**व्याख्या**

उत्तमाङ्गः-शिरः। आहारगुणाः यथा - आहारः प्रीणनं सद्यो बलवद्देहकारकः। (सुश्रुतसंहिता) ।स्वस्य इदं स्वकीयं। दिने भवं दैनिकं। समाजस्य इदं सामाजिकम् ।

जीर्णे हितं मितं चाद्यान्न वेगानीरयेत् बलात्।
न वेगितोऽन्यकारी स्यान्नाजित्वा साध्यमामयम्।।

भुक्ते जीर्णे (सति) हितं मितं च अद्यात्। वेगान् बलात् न ईरयेत्। वेगितः अन्यकारी न स्यात्। साध्य-असाध्य - कृच्छ्रसाध्य भेदेन रोगाः त्रिधा। साध्यम् आमयम् अजित्वा न अन्यकारी स्यात्। वेगान् - विसर्जननिद्राद्यावेगान्। ईरयेत् - ईर क्षेपे धातु वि.लिङ् प्र पु ए व ।न ईरयेत् - न क्षिपेत्। अकस्मात् - यदृच्छया। सङ्गते - मिलिते। पूर्वालापी - पूर्वं आलापं यः करोति सः। आलापः - भाषणम् ।

प्रयोगेण अनुभवेन सार्थकं भवेत्।

**न केवलं शास्त्रपठनेन अपि तु तस्य प्रयोगेण अनुभवेन अभ्यासेन चैवैतत् सार्थकं भवेत्। प्रातरुत्थाय कर्तव्यविषये चिन्ता एवं रात्रौ शयनात्पूर्वं कृतानां कर्मणां विवेचनं च कर्तव्यम्। एवं कृतानां करणीयानां च चिन्ता सदा सर्वथा च यस्य वर्तते सः कदापि दुःखभाङ्न भवेत्। एवम् अष्टाङ्गहृदये उक्तानाचाराहारविशेषान् ये अभ्युपगच्छन्ति ते नूनम् आयुरारोग्यसौख्यसम्पन्नाः यशस्विनश्च भवन्ति। उक्तं च अष्टाङ्गहृदये -**

**आयुः कामयमानेन धर्मार्थसुखसाधनम् ।**
**आयुर्वेदोपदेशेषु विधेयः परमादरः।। इति।**

---

## व्याख्या

दशधा पापकर्म यथा - हिंसा, स्तेयम्, अन्यथाकामम्, पैशुन्यम्, परुषम्, अनृतम्, सम्भिन्नालापम, व्यापादम्, अभिध्या, दृग्विपर्ययम् इति । इमानि कर्माणि

कायवाङ्मानसैः त्यजेत्। सद्व्रतं यथा -

आर्द्रसन्तानता त्यागः कायवाक्चेतसां दमः।
स्वार्थबुद्धिः परार्थेषु पर्याप्तमिति सद्व्रतम्। ।

चैवैतत्- च + एव + एतत् । प्रातरुत्थाय - प्रातः + उत्थाय। कर्तुं योग्यं कर्तव्यं । दुःखं भजन्ते इति दुःखभाक्। दुःखभाङ्न - दुःखभाक् + न। अभ्युपगच्छन्ति - स्वीकुर्वन्ति। आयुषः आरोग्यम् आयुरारोग्यं तेन सौख्यं आयुरारोग्य-सौख्यं आयुरारोग्यसौख्येन सम्पन्नाः आयुरारोग्यसौख्यसम्पन्नाः। पुरुषार्थसम्पादकम् आयुः अभिलषता नरेण आयुर्वेदानुशासनेषु परमा श्रद्धा देया। ना नरौ नरः । नरः नरौ नराः।

**पठनप्रवर्त्तनानि**

- नूतनपदानि चित्वा प्रवर्धमानशब्दकोशे निवेशयत।
- संश्लिष्टपदानि चित्वा सन्धिं विश्लेषयत।
- तृतीयाचतुर्थी विभक्त्यन्तानि पदानि चित्वा लिखत ।
- समयसारिणीमनुसृत्य स्वकीयां दिनचर्यां लिखत ।
  उदा :- अहं (५) पञ्चवादने उत्तिष्ठामि ।
  (५.१५) सपादपञ्चवादने दन्तधावनं करोमि ।
- अष्टाङ्गहृदये निर्दिष्टस्य सामाजिकव्यवहारस्य अधुनातनसामूहिकप्रसक्तिमाधारीकृत्य संगोष्ठीं चालयत लघुटिप्पणीं च लिखत।
- आयुः कामयमानेन अनष्ठेयानि कार्याणि पाठोक्तदिशा उपन्यसत।

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | नूतनपदानि चितानि। | | १/२/३/४ | |
| २ | संश्लिष्टपदानि विश्लिष्टानि । | | १/२/३/४ | |
| ३ | तृतीयाचतुर्थीविभक्त्यन्तपदानि चितानि। | | १/२/३/४ | |
| ४ | दिनचर्या लिखिता। | | १/२/३/४ | |
| ५ | संगोष्ठिं प्रचाल्य टिप्पणी लिखिता | | १/२/३/४ | |
| ६ | उपन्यासः लिखितः | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# २.३ तत्त्वामृतबिन्दवः

**पठनाधिगमाः**

- काव्यम् आलपति।
- अव्ययपदानि क्रोडीकरोति ।
- पदार्थं वदति।
- गद्यक्रमं लिखति।
- आशयं लिखति।
- दार्शनिकांशान् अधिकृत्य चर्चां करोति।

श्रीमता शङ्कराचार्येण विरचितः वेदान्ततत्त्वप्रतिपादकः प्रकरणग्रन्थः भवति विवेकचूडामणिः । सप्तशताधिकैः श्लोकैः निबद्धेऽस्मिन् ग्रन्थे अद्वैतवेदान्तसिद्धान्ताः संगृह्य प्रतिपादिताः । लोकोपकारकाः अनेके चिन्ताशकलाः अस्मिन् सङ्कलिताः। ततः उद्धृताः केचन श्लोकाः अत्र समाकलिताः।

दोषेण विषयः तीव्रः

**दोषेण तीव्रो विषयः**
**कृष्णसर्पविषादपि।**
**विषं निहन्ति भोक्तारं**
**द्रष्टारं चक्षुषाप्ययम्।। १ ।।**

पदच्छेदः

तीव्रो विषयः - तीव्रः + विषयः। चक्षुषाप्ययम् - चक्षुषा + अपि + अयम्।

| अन्वयः | अर्थः |
| --- | --- |
| विषयः | इन्द्रियविषयः (शब्दस्पर्शादयः) |
| दोषेण | नियन्त्रणराहित्यादिदोषेण |
| कृष्णसर्पविषादपि | घोरविषापेक्षयापि |
| तीव्रः(भवति) | मारकः(भवति) |

| | |
|---|---|
| विषम् | विषम् |
| भोक्तारम् | भक्षयन्तम् |
| निहन्ति | मारयति |
| अयम् | दोषेण तीव्रः विषयः (इन्द्रियसुखम्) |
| चक्षुषा | नेत्रेण |
| द्रष्टारम् अपि(निहन्ति) | पश्यन्तम् अपि मारयति। |

**तात्पर्यार्थः**

अनियन्त्रितविषयसङ्गः घोरविषादपि नाशहेतुको भवति। विषस्य भोजनेनैव एकस्य मरणं भवति, परन्तु दोषैः सहितानां विषयाणां दर्शनमात्रेण (प्रवृत्तिः न कार्या केवलज्ञानेन अपि)नाशः भवति। यः पुमान् सक्तः सन् भोगं कुरुते तस्य अवश्यं नाशः भविष्यति। अतः रूपरसादीन्द्रियविषयाणामुपरि संयमी भवेत्।

**व्याख्या**

पञ्चेन्द्रियाणि-श्रोत्र-त्वक्-चक्षु-रसना-नासिका। इन्द्रियविषयाः- शब्दस्पर्शरूपरसगन्धाः। द्रष्टारम् - साक्षादनुभोक्तारम्। निहन्ति - नि पूर्वक हन् हिंसागत्योः प प लट् प्र पु ए व। निहन्ति निहतः निघ्नन्ति। कृष्णसर्पः - कृष्णश्चासौ सर्पश्च। दर्शनमात्रेण - इन्द्रियजन्यज्ञानमात्रेण इति यावत्।

**राजा न भवति**

**अकृत्वा शत्रुसंहारम्**
**अगत्वाखिलभूश्रियम्।**
**राजाहमिति शब्दान्नो**
**राजा भवितुमर्हति।। २ ।।**

**पदच्छेदः**

अगत्वाखिलभूश्रियम् - अगत्वा + अखिलभूश्रियम्।
शब्दान्नो - शब्दात् + नो।

| **अन्वयः** | **अर्थः** |
|---|---|
| शत्रुसंहारम् | शत्रुनाशम् |
| अकृत्वा | न कृत्वा |
| अखिलभूश्रियम् | समस्तराजैश्वर्यम् |

| | |
|---|---|
| अगत्वा | अप्राप्य |
| अहं राजा | अहं राजा |
| इति शब्दात् | केवलम् उक्त्या |
| राजा | नृपः |
| नो | न |
| भवितुम् अर्हति। | भवेत्। |

**तात्पर्यार्थः**

शत्रुसंहारः स्वराज्यस्य ऐश्वर्यवर्धनञ्च राज्ञां धर्मः। यः राजा स्वधर्मन्न पालयति स राजा इति केवलशब्देन व्यपदिश्यते, स न कदापि राजा भवितुं योग्यः। केवलं वचोभिः न, कर्मणा एव नायकस्य नायकत्वम्।

**व्याख्या**

अखिलभूश्रियम् - अखिला च असौ भूः च, तस्याः श्रीः ताम् अखिलभूश्रियम्।

प्रयत्नः केन कार्यः?

**मस्तकन्यस्तभारादेः**
**दुःखमन्यैर्निवार्यते।**
**क्षुधादिकृतदुःखं तु**
**विना स्वेन न केनचित्।। ३ ।।**

**पदच्छेदः**

दुःखमन्यैर्निवार्यते - दुःखमन्यैः + निवार्यते।

| **अन्वयः** | **अर्थः** |
|---|---|
| मस्तकन्यस्तभारादेः | शिरसि निहितभारस्य |
| दुःखम् | दुःखम् |
| अन्यैः | इतरैः |
| निवार्यते। | दूरीक्रियते। |
| क्षुधादिकृतदुःखं तु | बुभुक्षादिपीडा तु |
| स्वेन विना | स्वप्रयत्नं विना |
| न केनचित् (निवार्यते)। | न अन्येन (निवार्यते)। |

तात्पर्यार्थः

शिरसि स्थितेन भारेण अनुभूयमाना पीडा अन्येषां साहाय्येन दूरीकर्तुं शक्यते। परन्तु बुभुक्षाद्यान्तरिकाणां क्लेशानां निवारणाय स्वयमेव प्रयत्नः कार्यः।

पञ्चभिरञ्चितः किम् ?

**शब्दादिभिः पञ्चभिरेव पञ्च**
**पञ्चत्वमापुः स्वगुणेन बद्धाः।**
**कुरङ्गमातङ्गपतङ्गमीन-**
**भृङ्गाः नरः पञ्चभिरञ्चितः किम्।। ४ ।।**

पदच्छेदः

पञ्चभिरेव - पञ्चभिः + एव।
पञ्चभिरञ्चितः - पञ्चभिः + अञ्चितः।

| **अन्वयः** | **अर्थः** |
|---|---|
| शब्दादिभिः | शब्दस्पर्शरूपरसगन्धैः |
| पञ्चभिः एव | पञ्चसंख्याकैः एव |
| कुरङ्गमातङ्गपतङ्गमीनभृङ्गाः | हरिणगजशलभमत्स्यभ्रमराः |
| पञ्च | पञ्चसंख्याकाः |
| स्वगुणेन बद्धाः | एकैकेन आत्मनिष्ठेन गुणेन सक्ताः |
| पञ्चत्वम् आपुः | मरणं प्राप्तवन्तः |
| पञ्चभिः | पञ्चेन्द्रियविषयैः |
| अञ्चितः | अलङ्कृतः |
| नरः | मनुष्यः |
| किं पुनः | किं पुनर्वक्तव्यम् (नश्यतीति)। |

तात्पर्यार्थः

हरिणगजशलभमत्स्यभ्रमराः शब्दादिभिः गुणैः बद्धाः मरणं प्राप्ताः भवन्ति। मनुष्यः तु पञ्चेन्द्रियैः शब्दादिभिः गुणैः च नितराम् आसक्तः भवति। एकेन गुणेन आकृष्टाः ते जन्तवः म्रियन्ते। पञ्चभिरपि विषयैः आकृष्टस्य मनुष्यस्य अवस्था किमु वक्तव्या।

**व्याख्या**

आपुः - आप्लृ व्याप्तौ लिट् प प प्र पु ब व। अञ्चितः - अञ्चू गतिपूजनयोः क्तप्रत्ययान्तः।

**पठनप्रवर्त्तनानि**

- श्लोकानां कक्ष्यायां सस्वरमालपनम् कुरुत।
- नूतनपदानि चित्वा स्वकीये शब्दकोशे योजयत ।
- पाठभागस्थानि संश्लिष्टपदानि चिनुत विश्लेषयत च। श्लोकानां गद्यक्रमं च लिखत।
- मनुष्याणाम् उपभोगतृष्णया प्रकृतिदूषणं विभवनाशनं च सम्पद्यते। एतयोः निवारणार्थम् इन्द्रियसंयमनस्य आवश्यकता इति विषये सङ्गोष्ठिं चालयत ।
- मनुष्यपशुपक्षिसहवर्तित्वस्य एकं हृदयस्पर्शिभित्तिपत्रम् पत्रिकामवलम्ब्य आरचयत ।

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | श्लोकाः आलपिताः | | १/२/३/४ | |
| २ | नूतनपदानि चितानि | | १/२/३/४ | |
| ३ | गद्यक्रमः लिखितः | | १/२/३/४ | |
| ४ | सङ्गोष्ठिः चालिता | | १/२/३/४ | |
| ५ | पत्रिकामवलम्ब्य भित्ति-पत्रम् आरचितम् | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# पीयूषम्



# ३.१ हुतं च दत्तं च तथैव तिष्ठति

**पठनाधिगमाः**

- सम्भाषणं कथारूपेण परिवर्त्य लिखिति।
- रूपकसङ्केतानधिकृत्य लघुटिप्पणीं लिखति।
- रूपकं पठित्वा पात्राभिनयं करोति।
- अव्ययानि क्रोडीकरोति।
- पात्रस्वभावं निरूपयति ।

संस्कृतरूपककारेषु प्रथमगणनीयो भवति महाकविः भासः। भासविरचितानि त्रयोदशरूपकाणि उपलभ्यन्ते। तेषु अन्यतमं भवति कर्णभारम्।

कुरुक्षेत्रयुद्धे भीष्मद्रोणयोः पतनानन्तरं कर्णः कौरवसेनापतिर्बभूव। मत्स्यनामकदेशस्य राजा शल्यः तस्य सारथिः अभवत् । तयोः रणाङ्कणप्रस्थानेन रूपकमिदमारभते। सम्भाषणमध्ये कर्णः परशुरामात्प्राप्तस्य अस्त्रस्य वृत्तान्तम् अश्रावयत्। प्रकरणवशात् गुरुशापमपि सोऽसूचयत्। तदनु सन्दर्भः अत्र दीयते।

**(ततः प्रविशति शल्येन नीयमानं रथमारूढः कर्णः)**

**कर्णः -** **शल्यराज! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः।**

**(नेपथ्ये)**

**भोः कर्ण ! महत्तरां भिक्षां याचे।**

**कर्णः -** **अये वीर्यवान् शब्दः। एषः न केवलं श्रीमान् द्विजवरोऽस्ति, यतः अस्य स्वरस्य महान् प्रभावः। अस्य घोरनिनदम् आकर्ण्य हयाः चित्रार्पिताङ्गा इव गतिप्रतिनिवृत्ताः भवन्ति। आहूयतां स विप्रः। न न अहमेवाह्वयामि। भगवन्नित इतः।**

**( ततः प्रविशति ब्राह्मणरूपेण शक्रः )**

**शक्रः -** **भो मेघाः, सूर्येणैव निवृत्य गच्छन्तु भवन्तः**

रथे कः वर्तते ?

---

**व्याख्या**

यत्रासावर्जुनस्तत्रैव - यत्र + असौ + अर्जुनः + तत्र + एव। शल्यराजः शल्यश्चासौ राजा च। नकारान्तः राजन् शब्दः समासे अकारान्तो भवेत्। चोद्यतां प्रेर्यतां। चुद् धातुः कर्मणि लोट् प्र पु ए व। नेपथ्यम् - कुशीलवकुटुम्बस्य गृहं नेपथ्यमुच्यते। कुशीलवः - अभिनेता। याचे - याचृ याचने लट् आ उ पु ए व। मम- अस्मद् शब्दः षष्ठी ए व। मम / मे - आवयोः / नौ - अस्माकम् / नः। द्विजवरः - ब्राह्मणश्रेष्ठः। द्विर्जायते इति द्विजः द्विजानां द्विजेषु वा वरः। तुरङ्गाः - अश्वाः। तुरगस्तु तुरङ्गमाः इत्यमरः। निनदः - शब्दः। आकर्ण्य - आ पूर्वक कर्ण कर्णभेदने ल्यबन्तमव्ययम्। चित्रार्पिताङ्गाः - चित्रे अर्पितानि अङ्गानि येषां ते। भगवन्नित इत - भगवन् + इतः + इतः ( नुडागमः)।

**(कर्णमुपगम्य) भोः कर्ण ! महत्तरां भिक्षां याचे।**

**कर्णः -** **दृढं प्रीतोऽस्मि भगवन्। एषोऽहं कर्णः भवन्तं नमस्करोमि।**

यशस्वी भव

**शक्रः -** **(आत्मगतम्) किं नु खलु मया वक्तव्यं,यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुर्भविष्यति।यदि न वक्ष्ये मूढ इति मां परिभवति। तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि। भवतु दृष्टम्। (प्रकाशम्) भोः कर्ण सूर्य इव,चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः।**

**कर्णः -** **भगवन् किं न वक्तव्यं दीर्घायुर्भवेति । अथवा एतदेव शोभनम्।**

**कुतः -**

**धर्मो हि यत्नैः पुरुषेण साध्यो**
**भुजङ्गजिह्वाचपला नृपश्रियः।**
**तस्मात् प्रजापालनमात्रबुद्ध्या**
**हतेषु देहेषु गुणा धरन्ते।।**

**भगवन् किमिच्छसि। किमहं ददामि।**

**व्याख्या**

सूर्येणैव - सूर्येण + एव। निवृत्य - नि पूर्वक वृत् ल्यबन्तमव्ययं। गच्छन्तु - गम्लृ लोट् प्र पु ब व। उपगम्य - उप पूर्वक गम्लृ ल्यबन्तमव्ययम्। प्रीतोऽस्मि - प्रीतः + अस्मि। आत्मगतं - अश्राव्यं स्वगतं स्मृतम्। प्रकाशं - सर्वश्राव्यं प्रकाशं स्यात्। दीर्घायुर्भवेति - दीर्घायुः + भव + इति। दीर्घम् आयुः यस्य सः। भव - भू लोट् म पु ए व। भविष्यति - भू लृट् प्र पु ए व। वक्ष्ये - ब्रूञ् व्यक्तायां वाचि आ ल उ ए व(धातोः वच् आदेशः)। परिहृत्य - परि पूर्वक हृ ल्यबन्तमव्ययम्।

**शक्रः -** **महत्तरां भिक्षां याचे।**

**कर्णः -** **महत्तरां भिक्षां भवते प्रदास्ये। श्रूयन्तां मद्विभवाः। गोसहस्रं ते ददामि।**

**शक्रः -** **गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण नेच्छामि।**

**कर्णः -** **किं नेच्छति भवान्। तर्हि वाजिनां सहस्रं ददामि।**

**शक्रः -** **अश्व इति। मुहूर्तकम् आरोहामि। नेच्छामि कर्ण नेच्छामि।**

**कर्णः-** **किं नेच्छति भवान्। तर्हि वारणानां वृन्दं ददामि।**

महत्तरां भिक्षां भवते प्रदास्ये

---

अन्वयः - धर्मः पुरुषेण यत्नैः साध्यः हि। नृपश्रियः भुजङ्ग-जिह्वाचपलाः। तस्माद् देहेषु हतेषु प्रजापालनमात्रबुद्ध्या गुणाः धरन्ते।

**व्याख्या**

धर्मः -शास्त्रोक्तविधिः। यत्नैः -स्वकीयैः उद्योगैः। साध्यः-कर्तव्यः हि-यतः। भुजङ्गजिह्वाचपलाः - भुजङ्गानां सर्पाणां जिह्वा रसना इव चपलाः चञ्चलाः भवन्ति। हतेषु-विनष्टेषु, प्रजापालनमात्रबुद्ध्या - प्रजानां पालने मात्रं (एव) बुद्धिः प्रजापालनमात्रबुद्धिः तया। गुणाः -दयादाक्षिण्यादयः। धरन्ते-अवशिष्टाः भवन्ति।

सारः - मानवेन धर्मः यत्नैः साध्यः एव, राजैश्वर्यं सर्पजिह्वा इव चञ्चलं भवति। तस्माद् देहेषु विनष्टेषु अपि प्रजापालनमात्रबुद्ध्या राजवंशः चिरं तिष्ठति। उपजातिः वृत्तम्।

भवते प्रदास्ये - दानार्थक धातोः योगे दातुम् उद्दिष्टस्य चतुर्थी विभक्तिः। नेच्छामि - न + इच्छामि। वाजिः - अश्वः। आरोहामि - आ पूर्वक रुह् धातोः लट् उ पु ए व। वारणः - गजः। वृन्दं - समूहः।

**शक्रः- गज इति। मुहूर्तकम् आरोहामि। नेच्छामि कर्ण नेच्छामि।**

**कर्णः- किं नेच्छति भवान्। अन्यदपि श्रूयताम्। अपर्याप्तं कनकं ददामि।**

नेच्छामि कर्ण नेच्छामि

**शक्रः - गृहीत्वा गच्छामि । (किञ्चिद्गत्वा) नेच्छामि कर्ण नेच्छामि।**

**कर्णः - तेन हि जित्वा पृथिवीं ददामि।**

**शक्रः - पृथिव्या किं करिष्यामि।**

**कर्णः - तेन ह्यग्निष्टोमफलं ददामि।**

**शक्रः - अग्निष्टोमफलेन किं कार्यम्।**

**कर्णः - तेन हि मच्छिरो ददामि।**

**शक्रः - अविहा। अविहा।**

**कर्णः - न भेतव्यं न भेतव्यम्। प्रसीदतु भवान्।**

**अन्यदपि श्रूयताम्**

**अङ्गैः सहैव जनितं मम देहरक्षा**
**देवासुरैरपि न भेद्यमिदं सहास्त्रैः।**
**देयं तथापि कवचं सह कुण्डलाभ्यां**
**प्रीत्या मया भगवते रुचितं यदि स्यात्॥**

---

**व्याख्या**

गृहीत्वा - ग्रह् क्त्वान्तमव्ययम्। अपर्याप्तं- अपरिमितं। पृथिवी - भूमिः, जित्वा - जि जये क्त्वान्तमव्ययं। ह्यग्निष्टोमफलं - हि + अग्निष्टोमफलं। अग्निष्टोमः - यज्ञविशेषः। मच्छिरः - मत् + शिरः। अविहा - शोकसूचकः निपातः।

अन्वयः - अङ्गैः सह एव जनितं सहास्त्रैः देवासुरैः अपि न भेद्यं, यदीदं कवचं (यद्यपि)मम देहरक्षा तथापि यदि भगवते रुचितं स्यात् (तर्हि) कुण्डलाभ्यां सह प्रीत्या मया देयं (भवति)।

पीयूषम्

**शक्रः -** **(सहर्षम्) ददातु ददातु।**

**कर्णः -** **(आत्मगतम्) एष एवास्य कामः। किं नु खल्वनेककपटबुद्धेः कृष्णस्योपायः। सोऽपि भवतु। धिक् अयुक्तमनुशोचितुम्। नास्ति संशयः। (प्रकाशम्) गृह्यताम्।**

**शल्यः -** **अङ्गराज! न दातव्यं न दातव्यम्।**

एष एवास्य कामः

---

व्याख्या

भेतव्यं - ञिभी भये तव्यप्रत्ययान्तम्। अस्त्रेण सह वर्तते इति सहास्त्रः तैः। अङ्गैः सह - शरीरावयवैः सह। देवाश्च असुराश्च देवासुराः तैः देवासुरैः। भेत्तुं योग्यं भेद्यं। कुण्डलं - कर्णाभरणं। रुचितं - अभिलषितं। देयं - दातुं योग्यम्।

सारः - यद्यपि अनेन कवचेन मम अङ्गरक्षणं भवति तथापि यदीदं भवदभीष्टं स्यात् तर्हि तदपि कुण्डलाभ्यां सह ददामि।

भगवते रुचितम् - रुच्यर्थधातोः योगे भगवते इति चतुर्थी। खल्वनेककपटबुद्धेः - खलु + अनेककपटबुद्धेः। कपटा चासौ बुद्धिः च कपटबुद्धिः। न एका अनेका। अनेका कपटबुद्धिः यस्य सः अनेककपटबुद्धिः तस्य।

अन्वयः - शिक्षा कालपर्ययात् क्षयं गच्छति, सुबद्धमूलाः पादपाः निपतन्ति। जलस्थानगतं जलं शुष्यति च। (किन्तु) हुतं दत्तं च तथा एव तिष्ठति।

कालपर्ययात् - समयापगमे। क्षयं गच्छति - नश्यति। सुबद्धमूलाः - दृढमूलाः, पादपाः पादैः (मूलैः) पिबन्ति इति पादपाः। शुष्यति - नश्यति। हुतं - समन्त्रम् अग्नौ क्षिप्तं। दत्तं - दानं कृतम्। (उचिते देशकाले सत्पात्रे अर्पितम्)। तथैव - तथा + एव।

हुतं च दत्तं च तथैव तिष्ठति

**कर्णः - शल्यराज! अलमलं वारयितुम्। पश्य -**

**शिक्षा क्षयं गच्छति कालपर्ययात्**
**सुबद्धमूला निपतन्ति पादपाः।**
**जलं जलस्थानगतञ्च शुष्यति**
**हुतं च दत्तं च तथैव तिष्ठति।।**

**कर्णः - तस्मात् गृह्यताम् । ( निकृत्य ददाति)।**

---

## व्याख्या

सारः - शिक्षा अपि कालक्रमेण नाशमेति। यद्यपि वृक्षाः दृढमूलाः भवन्ति तथापि कालक्रमेण पतन्ति। किन्तु यज्ञे समर्पितं वस्तु तथा दानेन लब्धं यशः च अनश्वररूपेण तिष्ठतः। ततः सर्वेभ्यः हुतं च दत्तं च प्रशस्ततरमिति भावः।

## पठनप्रवर्त्तनानि

- पाठभागं पठित्वा तत्रस्थानि नूतनपदानि अर्थमवगम्य स्वकीये शब्दकोशे निवेशयत।
- संयुक्तपदानि चिनुत, विश्लेषयत च ।
- पाठभागं पठित्वा कर्णस्य मनोगतम् अधिकृत्य लघु-टिप्पणीं लिखत ।
- रूपकं पठित्वा आशयं कथारूपेण परिवर्त्य लिखत।
- कर्णस्य चरित्रमहिमाविषये चर्चां समायोजयत लघु-टिप्पणीं च लिखत ।

चर्चासूचकाः - युद्धे स्थैर्यं, दानशीलत्वं, तस्य दीर्घदर्शित्वम् ।

- रूपकमिदं कक्ष्यायाम् अवतारयत ।
- पाठभागस्थानि अव्ययपदानि क्रोडीकृत्य पट्टिकां कुरुत ।

| | क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|---|
| उदा - | गत्वा | आगम्य | गन्तुम् |

## पठनप्रवर्त्तनानि

- स्वर-व्यञ्जन-विसर्गसन्धीनाम् उदाहरणानि सञ्चित्य पट्टिकां कुरुत ।

| | स्वरसन्धिः | व्यञ्जनसन्धिः | विसर्गसन्धिः |
|---|---|---|---|
| उदा | नेच्छामि | मच्छिरः | सारथिश्च |

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | नूतनपदानि चितानि | | १/२/३/४ | |
| २ | संयुक्तपदानि चितानि | | १/२/३/४ | |
| ३ | लघुटिप्पणी लिखिता | | १/२/३/४ | |
| ४ | आशयः परिवर्त्य लिखितः | | १/२/३/४ | |
| ५ | अभिनयः कृतः | | १/२/३/४ | |
| ६ | अव्ययानि क्रोडीकृतानि | | १/२/३/४ | |
| ७ | सन्धीनामुदाहरणानि सञ्चितानि। | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# ३.२ भावैकरसं मनः

**पठनाधिगमाः**

- काव्यम् आलपति।
- पदानि विवेचयति पदार्थं वदति च।
- गद्यक्रमं लिखति।
- अव्ययपदानि वाक्ये प्रयुङ्क्ते।
- ग्रन्थं ग्रन्थकर्तारं च अधिकृत्य टीकां लिखति।
- विभक्तिं क्रोडीकरोति ( पञ्चमी षष्ठी सप्तमी)।

कवेः कर्म काव्यम्। संस्कृतभाषायां काव्यं गद्यं पद्यं चेति द्विविधम्। अपादः पदसङ्घातो गद्यम्। चतुष्पादयुक्तं छन्दोबद्धं च पद्यम्। खण्डकाव्यं,महाकाव्यमिति भेदेन काव्यस्य पुनः द्वैविध्यम्। संस्कृतसाहित्ये माघः,कालिदासः,भारविः, श्रीहर्षश्च महाकाव्यानां प्रणेतारः भवन्ति। कालिदासस्य रघुवंशम्, कुमारसंभवम्, माघस्य शिशुपालवधम्, भारवेः किरातार्जुनीयम्, श्रीहर्षस्य नैषधीयचरितं चैव पञ्चमहाकाव्यत्वेन अङ्गीक्रियन्ते। तेषु महाकविषु कनिष्ठिकाधिष्ठितः कालिदासः स्वीयैः अन्यादृशैः वर्णनैः उचितैः भावसूचकैः सूक्ष्मचित्रणैश्च राज्यान्तरेष्वपि ख्यातिमुपजगाम। उपमाप्रयोगे अस्य दक्षतां पुरस्कृत्य उपमा कालिदासस्य इति प्रथा प्रचलिता वर्तते।संस्कृतमहाकाव्येषु अन्यतमं भवति कुमारसम्भवम्। काव्यस्यास्य कथाबीजं पद्मपुराणस्य सृष्टिकाण्डात् स्वीकृतमस्ति। अष्टमसर्गपर्यन्तं प्रवृत्तेऽस्मिन् महाकाव्ये हिमवद्वृत्तान्तः, तारकासुरविचेष्टितानि, कामदहनम्, रतिविलापः, ब्रह्मचारिकृतप्रेमपरीक्षा, सप्तर्षिकृता वधूयाचना, शिवपार्वत्योः विवाहः, कुमारोदयसूचना च क्रमशो वर्णिताः। परमेश्वरं भर्तारं लब्धुं कृतोद्यमां पार्वतीं ततो निवर्तयितुं वटुरूपेण तत्रागतः परमेश्वरः शिवनिन्दापराणि वाक्यानि प्रस्तौति। कृतनिश्चयायाः पार्वत्याः प्रतिवाक्यानि अत्र पाठभागे समुद्धृतानि।

**अथ पार्वती वटोः प्रश्नान् उत्तरति।**

**उवाच चैनं परमार्थतो हरं**
**न वेत्सि नूनं  यत एवमात्थ माम्।**
**अलोकसामान्यमचिन्त्यहेतुकं**
**द्विषन्ति मन्दाश्चरितं महात्मनाम्।। १ ।।**

त्वं हरं
न वेत्सि

**पदच्छेदः**

चैनम् - च + एनम्। मन्दाश्चरितम् - मन्दाः + चरितम्।

| **अन्वयः** | **अर्थः** |
| --- | --- |
| अथ | अनन्तरम् |
| एनमुवाच | ब्रह्मचारिणमुवाच |
| त्वं परमार्थतः | त्वं तत्त्वतः |
| हरम् | शिवम् |
| न वेत्सि | न जानासि। |
| नूनं | निश्चयेन |
| यतः | यस्मात् कारणात् |
| माम् एवम् | पार्वतीम् एवम् |
| आत्थ। | कथयसि। |
| मन्दाः | मूढाः |
| अलोकसामान्यम् | जनसाधारणादृष्टम् |
| अचिन्त्यहेतुकम् | दुर्ज्ञेयम् |
| महात्मनाम् | सज्जनानाम् |
| चरितम् | चरित्रम् |
| द्विषन्ति। | दूषयन्ति। |

**तात्पर्यार्थः**

वस्तुतः भवान् शिवस्य यथार्थरूपं न जानाति। तस्मात् भवता एवम् उक्तम्। लोके असाधारणं दुरवगमञ्च सज्जनानां चरित्रं मूढाः दूषयन्ति।

**व्याख्या**

परमश्चासौ अर्थः परमार्थः तस्मात् परमार्थतः। आत्थ- ब्रूञ् व्यक्तायां वाचि लट् प म पु ए व । आत्थ आहथुः ब्रूत। अलोकसामान्यं - लोकेषु सामान्यं लोकसामन्यं, न लोकसामान्यमित्यलोकसामान्यम्। लोकस्तु भुवने जने इत्यमरः। चिन्तयितुं शक्यः चिन्त्यः, न चिन्त्यः अचिन्त्यः। अचिन्त्यः हेतुर्यस्य तत् अचिन्त्यहेतुकम्। हेतुर्ना कारणं बीजम् इत्यमरः। महात्मनाम् - महान् च असौ आत्मा तेषां महात्मनाम्। उवाच - ब्रूञ् व्यक्तायां वाचि लिट् प प्र पु ए व । उवाच ऊचतुः ऊचुः। द्विषन्ति - द्विष अप्रीतौ प लट् प्र ब व। द्वेष्टि द्विष्टः द्विषन्ति।

मङ्गलम्
अनुष्ठीयते

**विपत्प्रतीकारपरेण मङ्गलं**
**निषेव्यते भूतिसमुत्सुकेन वा।**
**जगच्छरण्यस्य निराशिषः सतः**
**किमेभिराशोपहतात्मवृत्तिभिः।। २ ।।**

**पदच्छेदः**

जगच्छरण्यस्य - जगत् + शरण्यस्य।
एभिराशोपहतात्मवृत्तिभिः - एभिः + आशोपहतात्मवृत्तिभिः।

| **अन्वयः** | **अर्थः** |
|---|---|
| विपत्प्रतीकारपरेण | अनर्थपरिहारतत्परेण |
| भूतिसमुत्सुकेन वा | ऐश्वर्यकामेन वा |
| मङ्गलं निषेव्यते। | धर्म्यं कार्यमनुष्ठीयते। |
| जगच्छरण्यस्य | लोकाश्रयभूतस्य |
| निराशिषः | आशारहितस्य |
| सतः | सद्गुणयुक्तस्य |
| आशोपहतात्मवृत्तिभिः | मङ्गलनिषेधनादिभिः |
| एभिः | एभिः मंङ्गलैः |
| किं ? | किं फलम् ? |

### तात्पर्यार्थः

अनर्थपरिहारार्थिना ऐश्वर्यकामेन जनेन वा धर्म्यं कार्यमनुष्ठीयते।लोकाश्रयभूतस्य आशारहितस्य सद्गुणयुक्तस्य परमेश्वरस्य एतैरन्तःकरणदूषणसमर्थैः मङ्गलादिकर्मभिः किं प्रयोजनम्? न किमपि प्रयोजनमितिभावः।

### व्याख्या

विपदः प्रतीकारः विपत्प्रतीकारः तस्मिन् परः विपत्प्रतीकारपरः तेन विपत्प्रतीकारपरेण। भूतौ समुत्सुकः यः सः तेन भूतिसमुत्सुकेन। शरणे साधुः शरण्यः जगतां शरण्यः तस्य जगच्छरण्यस्य। आशया उपहता आशोपहताः आत्मनो वृत्तिरात्मवृत्तिः, आशोपहता आत्मवृत्तिः येषां तैः आशोपहतात्मवृत्तिभिः। श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभं इत्यमरः। निर्गता आशाः यस्मात् सः निराशीः तस्य। जगत् त्रिष्वधो जगती लोके विष्टपं भुवनं जगत्। निषेव्यते -नि षिव् सेवायां कर्मणि लट् प्र पु ए व।

**त्रिलोकनाथः एव शिवः**

**अकिञ्चनः सन् प्रभवः स सम्पदां**
**त्रिलोकनाथः पितृसद्मगोचरः।**
**स भीमरूपः शिव इत्युदीर्यते**
**न सन्ति याथार्थ्यविदः पिनाकिनः।। ३ ।।**

### पदच्छेदः

शिव इत्युदीर्यते - शिवः + इति + उदीर्यते।

| **अन्वयः** | **अर्थः** |
|---|---|
| सः | सः परमेश्वरः |
| अकिञ्चनः सन् | दरिद्रः सन् |
| सम्पदां प्रभवः | सर्वसम्पदामुद्भवस्थानम् |
| पितृसद्मगोचरः (सन्) | श्मशानवासी (सन्) |

| | |
|---|---|
| त्रिलोकनाथः | लोकत्रयस्य अधीशः |
| भीमरूपः (सन्) | भयङ्कराकारोऽपि |
| शिव इति | मङ्गलरूप इति |
| उदीर्यते। | उच्यते। |
| अतः | अस्मात् कारणात् |
| पिनाकिनः | परमेस्वरस्य |
| याथार्थ्यविदः | तत्वविदः |
| न सन्ति। | न विद्यन्ते। |

**तात्पर्यार्थः**

सः परमेश्वरः दरिद्रः सन्नपि सर्वसम्पदां प्रभवः भवति। श्मशानाश्रयः सन् लोकत्रयस्य नाथः भवति। सः भयङ्कराकारोऽपि मङ्गलरूप इति उच्यते। परमेश्वरस्य तत्वविद् अस्मिन् प्रपञ्चे न कोऽपि विद्यते।

**व्याख्या**

न विद्यते किञ्चन यस्य सः अकिञ्चनः। संपत्तिः श्रीश्च लक्ष्मीश्च इत्यमरः। पितृसद्मनि गोचरःपितृसद्मगोचरः। त्रयाणां लोकानां नाथः त्रिलोकनाथः। भीमं रूपं यस्य सः भीमरूपः। उदीर्यते - उद् ईर प्रेरणे कर्मणि लट् प्र पू ए व। पिनाकः अस्य अस्तीति पिनाकी तस्य पिनाकिनः। यथार्थस्य भावः याथार्थ्यं तद् विदन्ति इति याथार्थ्यविदः। सन्ति - अस् भुवि लट् प प्र पु ब व।

शिवं प्रणमति

**असम्पदस्तस्य वृषेण गच्छतः**
**प्रभिन्नदिग्वारणवाहनो वृषा।**
**करोति पादावुपगम्य मौलिना**
**विनिद्रमन्दाररजोऽरुणाङ्गुली।। ४ ।।**

**पदच्छेदः**

असंपदस्तस्य-असंपदः + तस्य। पादावुपगम्य-पादौ+ उपगम्य। मन्दाररजोऽरुणाङ्गुली - मन्दाररजः + अरुणाङ्गुली ।

| अन्वयः | अर्थः |
|---|---|
| प्रभिन्नदिग्वारणवाहनः | मदजलयुक्तं दिग्गजम् ऐरावतमारूढः |
| वृषा | देवेन्द्रः |
| वृषेण गच्छतः | वृषभम् आरुह्य गच्छतः |
| असम्पदः | सम्पत्तिहीनस्य |
| तस्य पादौ | शङ्करस्य पादौ |
| मौलिना | शिरसा |
| उपगम्य | प्रणम्य |
| विनिद्रमन्दाररजोऽ रुणाङ्गुली | विकसितमन्दाररेणुभिः रागयुक्ताङ्गुली |
| करोति। | तनोति। |

## तात्पर्यार्थः

दिग्गजमैरावतमारूढः देवेन्द्रः वृषभं(नन्दिनं) वाहनम् आरुह्य गच्छतः सम्पत्तिहीनस्य शङ्करस्य पादौ अलङ्कृतशिरसा प्रणम्य मुकुटे विद्यमानैः विकसितमन्दारपुष्पाणां रजोभिः अङ्गुली रक्तवर्णयुक्ताः क्रियन्ते। दिग्गजारोहिणा इन्द्रेणापि वन्द्यस्य शिवस्य ऋषभारोहणे न कश्चिद्विरोधः।

## व्याख्या

प्रभिन्नश्चासौ दिग्वारणश्च प्रभिन्नदिग्वारणः सः वाहनं यस्य सः प्रभिन्नदिग्वारणवाहनः। न विद्यते संपद् यस्य सः तस्य असंपदः। विनिद्रमन्दाररजोऽरुणाङ्गुली - विनिद्राणां मन्दाराणां रजोभिः अरुणाः अङ्गुल्यः ययोः तौ। मन्दारः - पञ्चैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् इत्यमरः।

शिवः ब्रह्मणः कारणम्

**विवक्षता दोषमपि च्युतात्मना**
**त्वयैकमीशं प्रति साधु भाषितम्।**
**यमामनन्त्यात्मभुवोऽपि कारणं**
**कथं स लक्ष्यप्रभवो भविष्यति।। ५ ।।**

**पदच्छेदः**

त्वयैकम् - त्वया + एकम् । यमामनन्त्यात्मभुवोऽपि - यम् आमनन्ति + आत्मभुवः + अपि।

| **अन्वयः** | **अर्थः** |
| --- | --- |
| च्युतात्मना | नष्टस्वभावेन |
| दोषमपि | दूषणमपि |
| विवक्षता | वक्तुम् अभिलषता |
| त्वया | वटुना |
| ईशं प्रति | शिवं प्रति |
| एकम् | एकं दूषणम् |
| साधु भाषितम्। | सम्यक् उक्तम्। |
| यम् | शिवं |
| आत्मभुवः अपि | ब्रह्मणः च |
| कारणं | निदानम् |
| आमनन्ति। | कथयन्ति। |
| सः | शिवः |
| कथं | केन प्रकारेण |
| लक्ष्यप्रभवः | लक्ष्यजन्मा |
| भविष्यति। | सम्भविष्यते। |

केवलं शिवस्य दोषमेव वक्तुं वाञ्छतापि नष्टस्वभावेन त्वया तमुद्दिश्यैकं वस्तु अलक्ष्यजन्मता इत्येतत् सम्यक् उक्तम्। वेदाः यं शिवं ब्रह्मणोऽपि जनयितारं वदन्ति सः शिवः लक्ष्यजन्मा कथं भविष्यतीति भावः।

**व्याख्या**

वक्तुम् इच्छन् विवक्षन् तेन विवक्षता। च्युतः आत्मा यस्य सः च्युतात्मा तेन च्युतात्मना। ब्रह्मात्मभूः सुरज्येष्ठः इत्यमरः। आमनन्ति आङ् पूर्वक म्ना लट् प्र पु ब व। लक्षितुं शक्यः लक्ष्यः स प्रभवः यस्य सः लक्ष्यप्रभवः। भविष्यति भू सत्तायां लृट् प्र पु ए व ।

**अलं विवादेन यथा श्रुतस्त्वया**
**तथाविधस्तावदशेषमस्तु सः।**
**ममात्र भावैकरसं मनः स्थितं**
**न कामवृत्तिर्वचनीयमीक्षते।। ६ ।।**

लोकापवादं न परिगणयति

**पदच्छेदः**

श्रुतस्त्वया- श्रुतः + त्वया । तथाविधस्तावत् - तथाविधः + तावत् । तावदशेषं - तावत् + अशेषम् । ममात्र मम + अत्र। कामवृत्तिर्वचनीयम् - कामवृत्तिः + वचनीयम्।

| **अन्वयः** | **अर्थः** |
|---|---|
| विवादेन अलम् | कलहेन साध्यं नास्ति |
| सः | शिवः |
| त्वया | भवता (वटुना) |
| यथा | येन प्रकारेण |
| श्रुतः | ज्ञातः |
| अशेषम् | निश्शेषम् |
| तथाविधः अस्तु | तत्प्रकारो भवतु |
| मम मनः | मदीयं चित्तम् |
| अत्र | अस्मिन् (शिवे) |
| भावैकरसम् | अभिलाषैकपक्षपाति |

| | |
|---|---|
| स्थितम् | संलग्नम् |
| कामवृत्तिः | स्वेच्छाव्यवहारी |
| वचनीयं न ईक्षते | निन्दां न विचारयति। |

**तात्पर्यार्थः**

अथवा कलहेन किं प्रयोजनम्? स शिवः भवता यथा श्रुतः तथैवास्तु। तत्र शिवे मे चित्तं भावपूर्णं वर्तते। स्वेच्छा व्यवहारी लोकापवादं न परिगणयति खलु।

**व्याख्या**

विवादः विवादो व्यवहार स्यात् इत्यमरः। विरुद्धो वादः विवादः तेन विवादेन। अशेषम् - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निश्शेषम्। विवादेन अलम् - निषेधार्थे अलं शब्दस्य योगे तृतीया विभक्तिः। भावे एकः रसः यस्य तत् भावैकरसम्। कामा वृत्तिः यस्य सः कामवृत्तिः। ईक्षते - ईक्ष दर्शने आ लट् प्र पु ए व।

**पठनप्रवर्तनानि**

- श्लोकान् सङ्घशः व्यक्तिशश्च तालयसमन्वितमालपत।
- श्लोकानाम् अन्वयानुसारम् आशयमवगम्य स्ववाक्यैः लिखत।

  श्रद्धेयांशाः-नूतनपदचयनम् अर्थनिर्धारणञ्च।

  स्वकीये निघण्टौ नूतनपदानां सन्निवेशः।

  सन्धियुक्तपदचयनं विश्लेषणञ्च।

  समस्तपदचयनं विग्रहवाक्यलेखनञ्च।
- पाठपुस्तकान्तर्गतेषु भवताम् इष्टतमः श्लोकः क इति सकारणं समर्थयत।

  श्रद्धेयांशाः -श्लोकचयनम्, आस्वादनटीकालेखनम्, सकारणं लेखनम्।
- कुमारसम्भवं कालिदासञ्चाधिकृत्य लघुटिप्पणीं लिखत।

## पठनप्रवर्तनानि

- शिवदूषणस्य पार्वत्याः समाधानम् पाठभागमधिकृत्य चर्चां कृत्वा स्ववाक्यैः लिखत।
- व्याख्यानं सारञ्च पठित्वा श्लोकानाम् आशयं स्ववाक्यैः टिप्पणीपुस्तके लिखत।
- उदाहृतानुसारं पाठान्तर्गतपदैः पट्टिकां पूरयत।

| **पञ्चमी** | **षष्ठी** | **सप्तमी** |
|---|---|---|
| कालिदासात् | कालिदासस्य | कालिदासे |

- उदाहृतानुसारं पाठान्तर्गतानि परस्मैपदआत्मनेपदक्रियारूपाणि चित्वा पट्टिकां कुरुत।

| **परस्मैपदि** | **आत्मनेपदि** |
|---|---|
| पठति | वन्दते। |

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | श्लोकः आलपितः | | १/२/३/४ | |
| २ | आशयः लिखितः | | १/२/३/४ | |
| ३ | आस्वादनटीका लिखिता | | १/२/३/४ | |
| ४ | लघुटिप्पणी लिखिता | | १/२/३/४ | |
| ५ | संग्रहः लिखितः | | १/२/३/४ | |
| ६ | पट्टिका पूरिता | | १/२/३/४ | |
| ७ | पट्टिका कृता | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

आरब्यवंगसिन्धुभ्यामुपेतो भारताम्बुधिः।
तरङ्गहस्तैस्सन्मुक्तैस्तत्पादार्चनमाचरत्।।



# जागरणम्



# ४.१ ज्ञानं कार्यान्वितं वरम्

**पठनाधिगमः**

- कथां वाचयति।
- संश्लिष्टपदानि समस्तपदानि क्रोडीकरोति।
- पदार्थं लिखति।
- कथासारं स्ववाक्येन लिखति।
- कथां भावात्मकतया वाचयति।
- क्रियारूपाणि लिखति।

वयं
मित्रत्वेन अवसाम

**" सखे कुत्रासि ? जलमाहर्तुं गतं चिरायितं भवन्तं प्रति व्याकुलो गुरुवरः।" देवशर्मणः वाण्या प्रबुद्धो धीरदासः प्रोवाच - " किं स्मरति भवान्? बाल्ये वयं चत्वारः मित्रत्वेन वसामः स्म। तदानीं ग्राममागतं**

व्याख्या

चत्वारः(पुल्लिङ्गे),चतस्रः(स्त्रीलिङ्गे), चत्वारि(नपुंसके)। यथा-
चत्वारः पुरुषः,चतस्रः स्त्रियः,चत्वारि कमलानि।

**पण्डितवर्यं वीक्ष्य तत्समानाः भवेम इति निश्चितवन्तश्च । तदर्थं कन्याकुब्जमेव गन्तव्यमिति निर्णीय सोत्साहम् अत्र आगताः। द्वादशवर्षाणि अतीतानि गुरुकुलवासेन।" एवं मिथो भाषमाणौ तौ उपाचार्यं प्रापतुः । तदानीं तयोः सुहृदौ प्रवरसेनः भुवनभूतिश्च गोश्चारणानन्तरं प्रत्यागतवन्तौ। सान्ध्यं विधिं समाप्य विश्रमावसरे ते चत्वारः सुहृदः संल्लापम् आरभन्त । प्रथमस्तु " वयमिदानीं शास्त्रपण्डिताः सञ्जाताः। अस्माभिः पुनः किमर्थमत्र उषितव्यम् ?" इत्युक्तवान्। द्वितीयः प्रत्यवदत् "तर्हि स्वदेशं प्रतिगच्छामः ।" तृतीयचतुर्थौ "तथा कुर्मः" इत्यङ्गीचक्रतुः। ततस्ते गुरोरनुज्ञया प्रतिनिवृत्ताश्च।**

स्वदेशं प्रतिगच्छामः

---

व्याख्या

अथैकदा - अथ + एकदा, निश्चितवन्तश्च - निश्चितवन्तः + च। उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। मन्त्रव्याख्याकृदाचार्यः आदेष्टा त्वध्वरी व्रती । इत्यमरः । पण्डितः -विद्वान् , विपश्चित् दोषज्ञ इत्यमरः। पण्डा आत्मविषया बुद्धिः सा अस्य सञ्जाता इति पण्डितः। सोत्साहम् - उत्साहेन सह वर्तते यस्मिन् कर्मणि तत् यथा तथा (क्रियाविशेषणं)। निर्णीय- निर् णीञ् ल्यबन्तमव्ययम्। गुरोरनुज्ञया - गुरोः + अनुज्ञया, उपाचार्यम् - आचार्यस्य समीपम् । मिथोऽन्योन्ये रहस्यपि इत्यमरः। शोभनं हृदयं यस्य मित्रस्य भवति सः सुहृद् , हृदयस्य हृदादेशः। संल्लापम् - यवलपरे यवला वा इति सूत्रेण अनुस्वारस्य मकारस्य स्थाने अनुस्वारः लकारः। सान्ध्यम्-सन्ध्यायां भवम्। शास्त्रपण्डिताः-शास्ति इति शास्त्रं तेषु पण्डिताः । उषितव्यम् - वस् धातु तव्यत् प्रत्ययान्तम्। कुर्मः- डुकृञ् करणे उभयपदि लट् प उ पु. ब.व। करोमि कुर्वः कुर्मः।

**पुस्तकानि गृहीत्वा गच्छन्तः ते ग्रामचतुष्पथं प्राप्य तत्रोपविष्टाः। " केन मार्गेण गन्तव्यम्?" तेष्वेकः अपृच्छत्।**

महाजनो येन गतः स पन्थाः

**एवं चिन्तानिरतेषु तेषु तन्मार्गेण कस्यचित् मृतस्य वणिक्पुत्रस्य दाहाय महाजनो गच्छन्नवर्तत। जनान् वीक्ष्य चतुर्णां मध्ये एकेन पुस्तकमवलोकितं कथितञ्च " महाजनो येन गतः स पन्थाः "। तस्मात् तेन मार्गेणैव गच्छामः। महाजनमनुसरन्तस्ते श्मशानं प्रापुः।**

व्याख्या

चतुष्पथम् - चतुर्णाम् पथां समाहारः। चतुष्पथम् - शृङ्गाटकचतुष्पथे इत्यमरः। तत्रोपविष्टाः- तत्र + उपविष्टाः। मार्गः-वीथी,पन्थाः। तेष्वेकः-तेषु + एकः।

वैदेहकः सार्थवाहो नैगमो वणिजो वणिक्। पण्याजीवो - ह्यापणिकःक्रयविक्रयिकश्च सः।। इत्यमरः । गच्छन्नवर्तत - गच्छन् + अवर्तत । कथितञ्च - कथितम् + च । मार्गेणैव-मार्गेण + एव। दाहाय -मृतकसंस्काराय । महाजनः-महान् च असौ जनः च । महाजनः - वणिग्जनः। महाजनो येन गतः स पन्थाः।

"तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः नैको मुनिर्यस्य मतं प्रमाणम्।

धर्मस्य तत्वं निहितं गुहायां महाजनो येन गतः स पन्थाः।।"

तर्कः अप्रतिष्ठः, श्रुतयः विभिन्नाः, ऋषयः अनेके, येषां मतं प्रमाणम्, धर्मस्य तत्वं गुहायां निहितम्। महाजनः येन गतः स पन्थाः। महाजनमनुसरन्तस्ते - महाजनम् अनुसरन्तः + ते। श्मशानं - पितृवनम्। श्मशानम् - शवानाम् शयनम्। गर्दभः - चक्रीवन्तस्तु वालेय रासभाः खराः- इत्यमरः। व्यसने - दुःखे।

**" अये, गर्दभमेकं पश्य " इत्युक्त्वा द्वितीयः पुस्तकमवलोक्य उक्तवांश्च "उत्सवे व्यसने प्राप्ते दुर्भिक्षे शत्रुसंकटे। राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ।।" अयमस्माकं बन्धुरिति निश्चित्य ते तमपूजयन् । अथ पितृवनं परितः अवलोक्य तत्रैकं त्वरितं गच्छन्तम् उष्ट्रं दृष्ट्वा विस्मिताः अभवन्। तृतीयस्तु ग्रन्थं परामृश्य "धर्मस्य त्वरिता गतिः", इति पठन् " अतोऽयमेव धर्मः" इत्यवदत्। ग्रन्थं निरीक्ष्य तुरीयेणोक्तम् " इष्टं धर्मेण योजयेत्" इति। अतस्ते रासभमुष्ट्रग्रीवायां बध्नन्ति स्म।**

" धर्मस्य त्वरिता गतिः"

---

व्याख्या

संपत्सु आपत्सु च यः समक्रियः भवति सः एव बन्धुः इति । बन्धुरिति -बन्धुः + इति। इत्युक्त्वा - इति + उक्त्वा। यस्तिष्ठति - यः + तिष्ठति। स बान्धवः - सः + बान्धवः।

पाठभेदः - उत्सवे व्यसने प्राप्ते दुर्भिक्षे *राष्ट्रविप्लवे (प्राणसङ्कटे)* / पितृवनं परितः - अभितः परितः समया निकषा हा प्रतियोगेऽपि इति वार्तिकेन परितः इत्यव्यययोगे द्वितीया। तत्रैकम् - तत्र + एकम्। उष्ट्रः - उष्ट्रे क्रमेलकमय-महाङ्गाः - इत्यमरः। धर्मस्य त्वरिता गतिः। यशः धर्मः पुण्यं च न कोऽपि जनं प्रतिपाल्य तिष्ठति। धर्मः यथाकालं स्वयं फलति। अतोऽयमेव-अतः + अयम् एव। यागजं फलम् इष्टम्। पुण्यजं फलं धर्मः। यागफलं विहितकर्मजन्येन धर्मेण सह योजयेत् । ग्रीवा - कण्ठः। बध्नन्ति स्म - स्म योगेन भूतार्थः। बन्ध(बन्धने)प लट् प्र पु ब व। बध्नाति बध्नीतः बध्नन्ति।

**तदा तत्रागतेन गर्दभस्वामिना ताडिताः ते पलायिताश्च। ते नदीतीरं प्राप्य उपविष्टाः। निर्मले जले प्लवन्तं सुन्दरं पलाशपत्रं दृष्ट्वा तेष्वन्यतमः पुस्तकमुद्घाट्य अवदत् " आगमिष्यति यत्पत्रं तदस्मांस्तारयिष्यति"इति। एवमुक्त्वा पत्रोपरि पतितः सः पण्डितः जले निमग्नः। द्वितीयो निमग्नस्य तस्य केशं गृहीत्वा पुस्तकञ्च पठित्वा उक्तवान् " सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः " इति। पण्डितम्मन्यः सः तस्य शिरः अच्छिनत् च।**

**पश्चात् गच्छन्तस्ते त्रयः कञ्चन जनपदं प्रापुः। ते सर्वे ग्रामीणैः पृथक् स्वगृहं नीतवन्तः। प्रथमः भोजनार्थं सूत्रिकामलभत।**

" अर्धं त्यजति पण्डितः"

---

व्याख्या

निरीक्ष्य - निर् ईक्ष् ल्यप् । तुरीयेणोक्तम् - तुरीयेण + उक्तम्। तुरीयः - चतुर्थः। गर्दभस्वामी - गर्दभस्य स्वामी । ताडिताः - प्रहताः। पलाशपत्रम् - आषाढपत्रम्।

आगमिष्यति यत्पत्रं तदस्मांस्तारयिष्यति। पत्रमित्यस्य नौका इति अर्थान्तरम्। सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः। पण्डितः सर्वनाशे समुत्पन्ने अर्धं त्यजति, हि अर्धेन कार्यं कुरुते, सर्वनाशो हि दुस्सहः। तदस्मांस्तारयिष्यति - तदस्मान् + तारयिष्यति। पण्डितम्मन्यः - पण्डितम् आत्मानं मन्यते इति । पण्डितमानी इत्यपि। शिरः - शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम् इत्यमरः। जनपदः ग्रामसमूहः। प्रापुः प्र पूर्वक आप्लृ लिट् प्र पु ब व। प्राप प्रापतुः प्रापुः । सूत्रिका - शष्कुली (सेवा इति प्रसिद्धः भक्ष्यविशेषः)। सूक्तिः शोभना उक्तिः।

**सः “दीर्घसूत्री विनश्यती”ति सूक्तिं विचिन्त्य भोजनमत्यजत्। द्वितीयाय अपूपः दत्तः। “अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषमि”त्युक्त्वा भक्षणं विहाय गतः। तृतीयाय माषवटिकां भोजनाय अयच्छत्। सोऽपि “छिद्रेष्वनर्था: बहुलीभवन्ति” इत्युक्त्वा अनश्नन् गतः।**

**क्षुधार्तास्ते ग्रामीणानां परिहासपात्रतामापन्ना: प्रतिनिवृत्ताश्च। शास्त्रग्रन्थानधीत्य यः यथाचारं प्रवृत्तिपथं योजयितुं न प्रभवति तस्य सा विद्या निरर्थिका हि।**

“ दीर्घसूत्री विनश्यती ”

व्याख्या

दीर्घसूत्री विनश्यति। झटित्येव यत् कर्तव्यं तदकृत्वा यः वृथा चिन्तापुरस्सरं कालं यापयति सः नाशमुपैति। दीर्घं सूत्रयति (आलोचयति) इति दीर्घसूत्री। अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषम् - यत् सारं विना विस्तृतं कृत्वा पुनः पुनराख्यायते तद् न स्थायि। वाग्मिता मितं च सारं च वचः हि। चिरम् आयुः यस्य सः चिरायुः तं चिरायुषम्। विहाय वि पूर्वक ओहाक् त्यागे ल्यबन्तम्। अयच्छत् - दाण् धातुः प लङ् प्र पु ए व। अयच्छत् अयच्छताम् अयच्छन्। सोऽपि - सः + अपि ।

छिद्रः कलहः। अबहुलम् बहुलं संपद्यमानं कुर्वन्ति बहुलीभवन्ति। अनश्नन् - न भक्षयन्। क्षुधार्ता: - क्षुधा आर्ता:। यथाचारम् - आचारमनतिक्रम्य। प्रवृत्तेः पन्थाः प्रवृत्तिपथः तं प्रवृत्तिपथम्।

**तदुक्तम्–**

**अपि शास्त्रेषु कुशलाः लोकाचारविवर्जिताः।**
**सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः ।।**

---

यान्ति - या प्रापणे लट् प.प.प्र पु.ब.व। याति यातः यान्ति।
मूर्खाः च ते पण्डिताः मूर्खपण्डिताः।

## पठनप्रवर्तनानि

- पाठभागम् उच्चैः पठत।
- कथां पठित्वा आशयं स्ववाक्यैः लिखत।

  **श्रद्धेयांशाः** - नूतनपदचयनम् अर्थनिर्धारणञ्च।
  स्वकीये निघण्टौ यथास्थानं नूतनपदानां सन्निवेशः।
  सन्धियुक्तपदचयनं विश्लेषणञ्च।
  समस्तपदचयनं विग्रहवाक्यलेखनञ्च।
  आशयलेखनम्।
- उदाहरणानि वीक्ष्य संश्लिष्टपदानि समस्तपदानि च विविच्य लिखत।

| संश्लिष्टपदानामुदाहरणानि | समस्तपदानामुदाहरणानि |
|---|---|
| केनैव - केन + एव | उपनेत्रम् |
| कुतश्च - कुतः + च | राजपुरुषः |
| कयोरेव - कयोः + एव | तृषार्ताः |

- पाठभागं पठित्वा गुरुशिष्ययोः भाषणं विभाव्य लिखत।
- पाठभागस्थाः सूक्तीः उद्धृत्य लिखत, समानाशयाः सूक्तीः च सञ्चिनुत।

■ प्रायोगिकज्ञानं जनहिताय कथम् उपकरोति इति विषये कथादिशा चर्चां प्रचालयत टिप्पणीञ्च लिखत।

सूचकाः- पुस्तकस्था विद्या, प्रायोगिकविद्या,तयोः समन्वयः।

■ भूतकालभविष्यत्कालप्रतिपादकान् लकारान् सञ्चिनुत उदाहरणानुसारं विविच्य लिखत च।

| | भूतकालः(लङ्) | भविष्यत्कालः(लृट्) |
|---|---|---|
| उदा | अभवत् | भविष्यति |

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | पाठः उच्चैः पठितः | | १/२/३/४ | |
| २ | आशयः स्ववाक्यैः लिखितः | | १/२/३/४ | |
| ३ | पदानि विविच्य लिखितानि | | १/२/३/४ | |
| ४ | भाषणं विभाव्य लिखितम् | | १/२/३/४ | |
| ५ | सूक्तिः सञ्चिता | | १/२/३/४ | |
| ६ | लकाराः विविच्य लिखिताः | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# ४.२ उत्तिष्ठत जाग्रत

**पठनाधिगमाः**

- पाठभागं वाचयति।
- पदानां अर्थं लिखति।
- आशयं लिखति।
- विवेकानन्दसन्देशमधिकृत्य टीकां लिखति।
- भाषान्तरीकरणं करोति।
- लट्,लृट्,लोट्,लङ्,विधिलिङ् लकाराणां पट्टिकां करोति।

युवजनदिनत्वेन आघुष्यते

**प्रायोगिकवेदान्तस्य प्रवाचकत्वेन ख्यातिमुपगतः नरेन्द्राख्यः स्वामी विवेकानन्दः विश्वयुवकानाम् आदर्शभूतः यतिकेसरी आसीत्। एते खलु १८६३ तमे वर्षे कोल्कत्ता (कालीघट्टम्) देशे जनुवरिमासस्य १२ दिने जनिमलभन्त। तस्य जन्मदिनं युवजनदिनत्वेन लोके सर्वत्र आघुष्यते। ईश्वरास्तित्वविषये सञ्जाता जिज्ञासा नरेन्द्रं श्रीरामकृष्णपरमहंसस्य समीपं प्रापयत्। अचिरादेव सः परमहंसस्य प्रियशिष्योऽभवत्।**

**व्याख्या**

यतिकेसरी - यतिः केसरी इव । यतिः - सन्यासी । जिज्ञासा - ज्ञातुम् इच्छा। प्रापयत् - प्र पूर्वक आप्लृ व्याप्तौ णिचि लङ् प्र पु ए व। प्रियशिष्योऽभवत् - प्रियशिष्यः + अभवत् । प्रियश्चासौ शिष्यश्च । युवयोगी - युवा च असौ योगी च।

**युवयोगी अयं चिक्कागो नगरे प्रचलिते विश्वधर्मसमारोहे भागमभजत्। तत्र प्रभाषणावसरे 'अमेरिक्कादेशीयाः मे स्वसारः भ्रातरश्च' इति सम्बोधनेन जनसहस्राणां मनांसि हठादाकर्षन् अयं भारतीयसंस्कृतेरौन्नत्यं प्राकटयत्। अत एव सभावासिनः अनवरतकरघोषैः तं बह्वमन्यन्त। पौरस्त्यतत्त्वसंहितायाः तथा पाश्चात्यप्रौद्योगिकतायाश्च समन्वयं स ऐच्छत्। वेदोपनिषदादिभिः भारतीयदर्शनैः प्रचोदितः सः भारतीयान् कर्मोन्मुखान् कृत्वा राष्ट्रस्य लोकस्य च गौरवोद्दीपनाय निस्तन्द्रम् अयतत ।**

भारतीयदर्शनैः प्रचोदितः सः

---

विश्वधर्मसमारोहः - World Religious Conference । अभजत् - भज् सेवायां पप लङ् प्र पु ए व। प्राकटयत् - प्रपूर्वक कट वर्षावरणयोः णिच् प प लङ् प्र पु ए व । बह्वमन्यन्त - बहु उपपदपूर्वक मन ज्ञाने आ प लङ् प्र पु ब व । प्रौद्योगिकता - Technology, . निस्तन्द्रम् - आलस्यं विना ।

।

व्याख्या

अन्वयः -सः सदा भारतमातरं निरन्तरं निषेवितुम् अतन्द्रितं सङ्घटितैः प्रवर्तनैः भासुरैर्लेखशतैः च निजानुयायिनः प्रचोदयामास।

सारः - विवेकानन्दः निरन्तरं भारताम्बां निश्शेषेण सेवितुम् आलस्यं विना सङ्घटिताभिः क्रियाभिः शोभनैः शताधिकैः लेखनैश्च स्वसहचरान् प्रेरयामास।

अतन्द्रितं सङ्घटितैः प्रवर्तनै-  
र्निषेवितुं भारतमातरं सदा।  
प्रचोदयामास निजानुयायिनो  
निरन्तरं लेखशतैश्च भासुरै :।।

(विश्वभानुः -डा. पि के नारायणपिल्ला)

शताधिकाः तस्य सूक्तयः भगवद्गीतायाः कर्मयोगं वारं वारम् उद्योतयन्ति। कर्मवैमुख्यमपाकर्तुं युवानः दृढचित्ताः भवेयुरिति इमाः सूक्तयः ज्ञापयन्ति। दिङ्मात्रमुदाह्रियते -

शुनकस्य भषणं श्रुत्वा मा भैष्ट

"मानवेषु अन्तर्लीनायाः पूर्णतायाः परिस्फूर्तिरेव शिक्षा। धर्मस्तु तेषु अन्तर्निहितस्य दिव्यत्वस्य द्योतनमेव । शिक्षायाः धर्मस्य च विषये विघ्ननिवारणं मार्गदर्शनञ्च गुरोः नियोगः। शिष्टानि मूल्यानि स्वयमेव छात्रान् उपयास्यन्ति।"

"सामाजिकापचयस्य हेतुर्वयमेवेति स्मरणीयमस्ति। भविष्यत्काले कीदृशीं दशां प्राप्नुयात् इति निर्णेतुम् शक्तिरस्मास्वेव। भूतकालस्य परिपाकः एवाद्यतनी स्थितिरित्यतः भाविभागधेयस्य संसृष्टौ वयमेव सर्वथा समर्थाः भवेम।"

"मम कर्मधीराः युवकाः यूयं सर्वे महान्ति कार्याणि कर्तुमागताः इति विश्वासः युष्मासु अवश्यं भवेत्। शुनकस्य भषणं श्रुत्वा मा भैष्ट। गगने विद्यमानेन विद्युतः प्रभावेनापि चकिताः न भवेत"।

---

व्याख्या

उद्द्योतयन्ति - उद् पूर्वक द्युत दीप्तौ णिचि लट् प्र पु ब व। ज्ञापयन्ति - ज्ञा ज्ञाने णिचि प प लट् प्र पु ब व। अपाकर्तुं - दूरीकर्तुं, भवेयुः - भू वि लि प्र पु ब व, दिङ्मात्रं - किञ्चन, परिस्फूर्तिः - अभिव्यक्तिः, धर्मः - आचारः। हेतुर्वयमेव - हेतुः + वयम् एव, शक्तिरस्मास्वेव -शक्तिः + अस्मासु + एव, स्थितिरित्यतः - स्थितिः + इत्यतः, संसृष्टौ - निर्माणे, भषणं - शुनकस्य शब्दविशेषः, अभैष्ट - ञिभी भये लुङ् म पु ब व, माङ् योगे लुङ्, न माङ् योगे इति अडागमनिषेधात् मा भैष्ट इति।

**“ उत्तिष्ठत जाग्रत ” इति स्वामी विवेकानन्दः यूनः उदबोधयत् ।**

**एकदा स्वामी काशीनगरसमीपम् अटन्नासीत्। तदा केचन वानराः मार्गमवरुद्ध्य अतिष्ठन्। चकितः सः ततः अधावत्। अनुधावन्तः कपयः नखदशनादिभिः तमाक्रान्तुमुद्यताः। तद्दृष्ट्वा कश्चन पथिकः तमवदत् 'मा पलायस्व, तेषामभिमुखो भव' इति। स्वामिनि तथानुष्ठिते वानराः भीताः प्रतिनिवृत्ताः। अनेन दृष्टान्तेन स्वामी मनसः प्रबलीकरणस्य अनिवार्यतां प्राबोधयत्।**

“ उत्तिष्ठत जाग्रत ”

**नवत्रिंशद्वर्षपरिमितेन स्वकीयेन जीवितेन अतिविस्तृतानां भारतीयदर्शनानां प्रायोगिकतां लोकाय प्रकाशयन् अयं कर्मयोगी आचन्द्रतारं शोभतेतराम्।**

---

**व्याख्या**

“उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।
क्षुरस्य धारा निशिता दुरत्यया
दुर्गं पथस्तत् कवयो वदन्ति।।”

(कठोपनिषत् १-३-१४)

यूनः - युवकान्। अटन्नासीत् - अटन् +आसीत् । स्वामिनि तथा अनुष्ठिते - यदा स्वामी तथा अनुष्ठितः तदा।

**पठनप्रवर्त्तनानि**

■ उपन्यासं पठित्वा आशयं संगृह्य लिखत।

**श्रद्धेयांशाः** -नूतनपदचयनम् अर्थनिर्धारणञ्च।

स्वकीये निघण्टौ यथास्थानं नूतनपदानां सन्निवेशः।

सन्धियुक्तपदचयनं विश्लेषणञ्च।

समस्तपदचयनं विग्रहवाक्यलेखनञ्च।

आशयलेखनम्।

- अव्ययपदानि चित्वा लिखत।
- विवेकानन्दस्य इतराः सूक्तीः च समाहृत्य प्रभाषणमेकं स्वकक्ष्यायाम् अवतारयत ।
- विवेकानन्दस्य सन्देशमधिकृत्य टिप्पणीं लिखत।
- लट्, लृट्, लङ्, लोट्, विधिलिङ् च पठितपूर्वेभ्यः पाठेभ्यः विविच्य पट्टिकारूपेण लिखत।

| लट् | लृट् | लङ् | लोट् | विधिलिङ् |
|---|---|---|---|---|
| पठति | पठिष्यति | अपठत् | पठतु | पठेत् |

- विवेकानन्दस्य उद्बोधनानि यूनां कथं प्रचोदकानि अभवन् इति विषये चर्चां कृत्वा टिप्पणीं लिखत ।

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | आशयः संगृह्य लिखितः | | १/२/३/४ | |
| २ | अव्ययानि चितानि | | १/२/३/४ | |
| ३ | प्रभाषणम् अवतारितम् | | १/२/३/४ | |
| ४ | टिप्पणी लिखिता चर्चा कृता च | | १/२/३/४ | |
| ५ | विविच्य लकाराणां पट्टिका कृता | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# भूषणम्



# ५.१ भूषणम्

**पठनाधिगमाः**

- अलङ्कारान् विशदयति।
- अलङ्कारभेदान् अधिकृत्य टीकां लिखति।
- अलङ्कारलक्षणं लिखति।

**काव्यशोभाकराः धर्माः अलङ्काराः**

अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम् इति काव्यलक्षणमालङ्कारिकैः निर्दिष्टम्। उत्कर्षहेतवो गुणाः, अपकर्षहेतवो दोषाः। काव्यशोभाकराः धर्माः अलङ्काराः इति वक्तुं शक्यते। यथा कटककुण्डलकङ्कणादयो अलङ्काराः शरीरस्य शोभामापादयन्ति तथा काव्यशरीरभूतयोः शब्दार्थयोः शोभादायकाः उपमानुप्रासादयः धर्माः अलङ्काराः इत्युच्यन्ते।

एवञ्च शब्दरूपस्य शरीरस्य शोभादायकाः शब्दालङ्काराः यमकानुप्रासादयः, अर्थरूपस्य शरीरस्य शोभादायकाः अर्थालङ्काराः उपमोत्प्रेक्षादयः इति अलङ्काराः द्वेधा विद्यन्ते। अर्थालङ्काराश्च सादृश्यमूलकाः, अतिशयमूलकाः, श्लेषमूलकाः, स्वभावमूलका इति चतुर्विधाः भवन्ति।

उपमादयः सादृश्यमूलकाः, अतिशयोक्त्यादयः अतिशयमूलकाः श्लेषादयः श्लेषमूलकाः, स्वभावोक्त्यादयः स्वभाव-मूलकाश्च भवन्ति। वर्ण्यस्य वस्तुनः सम्यगवबोधनाय अलङ्काराः उपकुर्वन्ति।

अलङ्काराः सर्वदा चमत्कृतिजनका एव भवेयुः। सहृदयहृदयाह्लादजनकः काव्यनिष्ठो धर्म एव चमत्कृतिः (चमत्कारो वा)। अतः रामः कृष्ण इव सम्यगधीते इति वाक्ये रामस्य कृष्णेन सादृश्यस्य प्रतिपादनेऽपि नालङ्कारः। तत्रत्यं सादृश्यन्न चमत्कृतिजनकम्।

चमत्कृतिजनका एव

वर्ण्यम्, उपमेयम्, प्रकृतम्, विषयः, प्रस्तुतम् इत्यादयः शब्दाः प्रायः अलङ्कारशास्त्रे समानार्थकाः प्रयुज्यन्ते ।अवर्ण्यम्, उपमानम्, अप्रकृतम्, विषयी, अप्रस्तुतमित्येवमादयोऽपि समानार्थकाः। वर्णयितुं योग्यं वस्तु वर्ण्यम्। उपमातुं योग्यम् उपमेयम् अप्रसिद्धम्। येन उपमीयते तदुपमानम्, अप्रकृतं प्रसिद्धं वस्तु। अत्र उपमा, उत्प्रेक्षा चेति अलङ्कारद्वयं पाठतया निर्दिष्टम्। इमौ सादृश्यमूलकौ अलङ्कारौ भवतः। उपमा सर्वालङ्कारबीजभूता इति आलङ्कारिकाः वदन्ति।

## उपमालङ्कारः

लक्षणम्

उपमा यत्र सादृश्य
लक्ष्मीरुल्लसति द्वयोः।
हंसीव कृष्ण! ते कीर्तिः
स्वर्गङ्गामवगाहते।।

व्याख्या

यत्र यस्मिन् काव्ये द्वयोः उपमानोपमेययोः वस्तुनोः सहृदयहृदयाह्लादजनकं सादृश्यं भाति सुव्यक्ततया स्पष्टं प्रकाशते तत्र उपमालङ्कारः।

सादृश्यलक्ष्मीः स्पष्टं प्रकाशते

अत्र उदाहरणे हे कृष्ण ते कीर्तिः हंसी इव स्वर्गङ्गायाम् अवगाहते प्रविशति इत्यर्थः। अत्र कीर्तिहंस्योः सादृश्यलक्ष्मीः स्पष्टं प्रकाशते इति उपमालङ्कारः।

उदाहरणे हंसी उपमानं कीर्तिरुपमेयं, स्वर्गङ्गावगाहनं साधारणो धर्मः,इवशब्द उपमावाचक इति चतुर्णामप्युपादानात् पूर्णोपमा । एतेषां चतुर्णां मध्ये एकस्य द्वयोः त्रयाणां वा शब्दतः अनुपादानात् लुप्तोपमा च। उदाहरणम् - तडिद्गौरी तन्वी। तडिदिव गौरी तन्वी इत्यर्थः। अत्र उपमावाचकशब्दः लुप्त इत्यतः लुप्तोपमा।

## उत्प्रेक्षालङ्कारः

लक्षणम्

**संभावना स्यादुत्प्रेक्षा वस्तु हेतुफलात्मना।**

संम्भावना उत्प्रेक्षा स्यात्। उत्प्रेक्षा इति लक्ष्यनिर्देशः सम्भावना इति लक्षणम्। निश्चयभिन्नं सन्देहभिन्नं च ज्ञानं संम्भावना, उत्कटैकतरकोटिकः संशयः संम्भावना। अन्यधर्मसम्बन्धेन निमित्तेन अन्यस्यान्यतादात्म्यसम्भावनम् उत्प्रेक्षा। उत्प्रेक्षा त्रिविधा वस्तूत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षा चेति।

### वस्तूत्प्रेक्षा

लक्षणम्

कस्यचिद्वस्तुनः वस्त्वन्तरतादात्म्यसम्भावना वस्तूत्प्रेक्षा।

वस्त्वन्तरतादात्म्य
संभावना
वस्तूत्प्रेक्षा

**धूमस्तोमं तमश्शङ्के कोकीविरहशुष्मणाम्।**

व्याख्या

अहं तमः अन्धकारं, कोकीनां-चक्रवाकाङ्गनानां विरहशुष्मणां विरहाग्नीनां धूमपटलं, शङ्के-तर्कयामीत्यर्थः। अत्र रात्रौ प्रवर्धमानम् अन्धकारात्मकं वस्तु कोकीविरहाग्निनां धूमपटलत्वेन वस्त्वात्मना उत्प्रेक्ष्यते। शङ्के इति उत्प्रेक्षा द्योतकः शब्दः। एवं मन्ये, ध्रुवं,प्रायः, नूनम्, इव इत्यादयोऽपि उत्प्रेक्षा द्योतकाः शब्दाः।

**हेतूत्प्रेक्षा**

लक्षणम्

अहेतोः हेतुभावेन सम्भावना हेतूत्प्रेक्षा।

**रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम्।**

तव मृदुलौ अङ्घ्री (चरणौ) भुवि विक्षेपणात् (निक्षेपात् सञ्चाराद्) हेतोः रक्तौ (लोहितौ ) ध्रुवम् । इत्यत्र भुवि विक्षेपणं पादयोः रक्तत्वस्य हेतुत्वेन उत्प्रेक्ष्यते । पादयोः रक्तत्वस्य स्वतः सिद्धत्वाद् भुवि विक्षेपणन्न हेतुः तथापि हेतुत्वसम्भावनया हेतूत्प्रेक्षा।

**फलोत्प्रेक्षा**

लक्षणम्

अफलस्य फलत्वेन सम्भावना फलोत्प्रेक्षा।

**प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति।**

हे कान्ते ! प्रायः अब्जं तव पदेन ऐक्यं प्राप्तुं तोये तपस्यति इत्यत्र पद्मस्य जले स्वाभाविकमवस्थानं तत् तपस्त्वेन अध्यवसितम्। कामिनीपादप्राप्त्यर्थमिति अफलस्य फलत्वेन वर्णितत्वात् फलोत्प्रेक्षा।

**पठनप्रवर्त्तनानि**

- दिनस्य पूर्वार्द्धपरार्द्धभिन्ना
  छायेव मैत्री खलसज्जनानाम्।
  अत्र उपमानम्, उपमेयम्, साधारणधर्मः, उपमावाचकश्च विवेचयत।
- गानान्तरेभ्यः श्लोकेभ्यश्च उपमायाः उदाहरणानि सञ्चित्य संपुटनिर्माणं कुरुत।

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | उपमानादीनां विवेचनं कृतम् | | १/२/३/४ | |
| २ | उदाहरणान्तराणि सञ्चितानि | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

# ५.२ वृत्तानि

**पठनाधिगमाः**

- गुरुलघुभेदं लिखति।
- गणविभजनं करोति।
- वृत्तनिर्णयं करोति।

**संस्कृते साहित्यरचनाः प्रायशः पद्यरूपेण भवन्ति इत्यतः छन्दः शास्त्रस्य अधिकं प्राधान्यमस्ति। वृत्तनिर्णयः छन्दोऽनुसारमेव भवति। मात्रावृत्तं वर्णवृत्तं चेति वृत्तानां द्वैविध्यम्। आर्यागीत्यादीनि मात्रावृत्तानि येषु मात्रानुसारं छन्दोबद्धतां कल्पयन्ति। इन्द्रवज्रादीनि वर्णवृत्तानि यत्र गुरुलघुभेदान् तथा अक्षरसंख्यां चाश्रित्य निर्णयः। वर्णवृत्तान्यपि समानि अर्धसमानि विषमाणि इति त्रिविधानि सन्ति। प्रतिपादं वर्णसंख्या समा चेत् समवृत्तम्। अयुजि युजि पादे च वर्णसंख्या भिद्यते चेत् अर्धसमवृत्तम्। चतुर्ष्वपि पादेषु अक्षरसंख्या विषमा (भिन्ना) चेत् विषमवृत्तम् इति व्यवस्था।**

वृत्तनिर्णयः छन्दोऽनुसारमेव

**प्रतिपादम् एकस्मादक्षरादारभ्य षड्विंशतिपर्यन्तानि अक्षराणि भवेयुः। एवं विभिन्नानि छन्दांसि वर्तन्ते। षड्विंशत्याः ऊर्ध्वमक्षरसंख्या चेत् तद् दण्डकमिति व्यवह्रियते।**

**लघुगुरुविवेकः**

**ह्रस्वो लघुः**
**दीर्घो गुरुः**

ह्रस्वो लघुः। यस्य अक्षरस्य / शब्दस्य उच्चारणाय एकमात्रात्मकं कालमपेक्षते स ह्रस्वः लघुः इति।

दीर्घो गुरुः। सानुस्वारः, सविसर्गः संयोगात्पूर्वः च ह्रस्वोऽपि उच्चारणाय मात्राधिकं कालमपेक्षते इति हेतोः ते ह्रस्वाः अपि गुरुत्वमार्जयन्ति।

**गणविवेकः**

**लक्षणम्**

**आदिमध्यवसानेषु यरता यान्ति लाघवम्।**
**भजसा गौरवं यान्ति मनौ तु गुरुलाघवम्।।**

गुरुः '—' चिह्नेन, लघुः 'U' चिह्नेन च सूच्येते।

| | | |
|---|---|---|
| यगणः | यमादिः। | U — — |
| रगणः | राजभिः। | —U — |
| तगणः | ताम्राक्षि। | — — U |
| भगणः | भ्रामय। | —UU |
| जगणः | जगाम। | U — U |
| सगणः | सततं। | U U — |
| मगणः | मन्दारः। | — — — |
| नगणः | नमति। | UUU |

अत्र समवृत्तेषु उपजातिः (त्रिष्टुप् छन्दसि) वंशस्थम्, (जगतीच्छन्दसि) वसन्ततिलका (शक्वरीच्छन्दसि) तथा अनुष्टुप् श्लोकः च प्रतिपाद्यन्ते। असमवृत्तेषु वियोगिनी च दीयते।

## १. अनुष्टुप् (श्लोकः)

लक्षणम्

**“श्लोके षष्ठं गुरुर्ज्ञेयं सर्वत्र लघु पञ्चमम्।**
**द्विचतुष्पादयोः ह्रस्वं सप्तमं दीर्घमन्ययोः।।”**

व्याख्या

सर्वेषु पादेषु पञ्चमवर्णः लघुः द्वितीयचतुर्थयोः पादयोः सप्तमवर्णोऽपि लघुः एव। सर्वेषु पादेषु षष्ठः वर्णः गुरुः च भवति। प्रथमे तृतीये च पादे सप्तमं दीर्घं च स्यात्। एवं प्रतिपादमष्टौ वर्णाः।

उदाहरणम्

U— —
**“मस्तकन्यस्तभारादेः**
U — U
**दुःखमन्यैर्निवार्यते।**
U— —
**क्षुधादिकृतदुःखं तु**
U—U
**विना स्वेन न केनचित्।। ”**

व्याख्या

उदाहरणे प्रथमपादे ‘मस्तकन्यस्तभारादेः’ इत्यत्र पञ्चमषष्ठवर्णौ यथाक्रमं लघुगुरु भवतः। द्वितीयचतुर्थयोः पादयोः सप्तमवर्णोऽपि लघुः भवति। प्रथमतृतीयपादयोः सप्तमो वर्णः गुरुश्चेति श्लोकसंज्ञकोऽयं भवति।

## २. उपजातिः

लक्षणम्

**“अनन्तरोदीरितलक्ष्मभाजौ**
**पादौ यदीयावुपजातयस्ताः।।”**

व्याख्या

इन्द्रवज्रोपेन्द्रवज्रालक्षणयोः एकस्यैव श्लोकस्य पादेषु मिश्रणं चेत् उपजातिः भवति।

**उदाहरणम्**

| उदा - त | त | ज | गु गु |
|---|---|---|---|
| — —∪ | — — ∪ | ∪—∪ | — — |
| **साहित्य** | **सङ्गीत** | **कलावि** | **हीनः** |

**साक्षात्पशुः पुच्छविषाणहीनः।**

| ज | त | ज | गु गु |
|---|---|---|---|
| ∪—∪ | — —∪ | ∪ — ∪ | — — |
| **तृणं न** | **खादन्न** | **पि जीव** | **मान-** |

**स्तद्भागधेयं परमं पशूनाम्।।**

**व्याख्या**

अत्र प्रथमद्वितीयचतुर्थपादेषु इन्द्रवज्रायाः तृतीयपादे उपेन्द्रवज्रायाः च लक्षणस्य समन्वयात् उपजाति वृत्तम्।

**इन्द्रवज्रा** - "स्यादिन्द्रवज्रा यदि तौ जगौ गः।"

प्रतिपादं तगणद्वयं जगणः गरुद्वयं चेति एकादशवर्णाः यदि स्युः तर्हि इन्द्रवज्रा वृत्तम्। पादान्ते यतिः कल्पनीया। (श्लोकेषु विश्रमस्थानं यतिरित्यभिधीयते)।

उदा- अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः।
जातो ममायं विषदः प्रकामम्
प्रत्यर्पितन्यास इवान्तरात्मा।।

अत्र तगण, तगण, जगणाः गुरुः इति क्रमशः भवन्ति इत्यतः इन्द्रवज्रा। प्रथमपादे एव इत्यत्र वकारः वा पादान्ते - इति नियमेन गुरुः।

**उपेन्द्रवज्रा** - "उपेन्द्रवज्रा जतजास्ततो गौ।" प्रतिचरणं जगणः, तगणः, जगणः, गुरुद्वयं चेति एकादशवर्णाः भवन्ति चेत् तद् वृत्तमुपेन्द्रवज्रेति कथ्यते।

उदा-
अलं महीपाल तवश्रमेण
प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्ति रंह;
शिलोच्चये मूर्च्छति मारुतस्य।।

अत्र उक्तलक्षणस्य सत्वाद् उपेन्द्रवज्रा। चतुर्ष्वपि पादेषु लक्षणं समानमेव।

वस्तुतः एतादृशस्य श्लोकस्य प्रथमवर्णावगमनेनैव इन्द्रवज्रायाः उपेन्द्रवज्रायाः वा लक्षणसमन्वयः इत्यवगम्यते। पादे प्रथमवर्णस्य गुरुत्वे इन्द्रवज्रा लाघवे उपेन्द्रवज्रा इति।

## ३. वंशस्थम्

लक्षणम्

**"जतौ तु वंशस्थमुदीरितं जरौ।"**

यस्य पादे जगणतगणौ जगणरगणौ चेति द्वादश वर्णाः भवेयुः तद् वंशस्थं नाम वृत्तं भवति।

| ज | त | ज | र |
|---|---|---|---|
| U _ U | _ _ U | U _ U | _ U _ |
| **उवाच** | **चैनं प** | **रमार्थ** | **तो हरं** |

उदाहरणम्

**न वेत्सि नूनं यत एवमात्थ माम्।**
**अलोकसामान्यमचिन्त्यहेतुकं**
**द्विषन्ति मन्दाश्चरितं महात्मनाम्।।**

अत्र उक्तलक्षणस्य समन्वयात् वंशस्थम्।

## ४. वसन्ततिलका

लक्षणम्

**“उक्ता वसन्ततिलका तभजा जगौ गः।”**

प्रतिचरणं तगणः भगणः जगणद्वयं गुरुद्वयं चेति चतुर्दश वर्णाः भवन्ति चेत् तत् वसन्ततिलका नाम वृत्तं स्यात्।

उदाहरणम्

| त | भ | ज | ज | गु गु |
|---|---|---|---|---|
| — — U | —U U | U — U | U—U | — — |
| **प्रारभ्य** | **ते न ख** | **लु विघ्न** | **भयेन** | **नीचैः** |

**प्रारभ्य विघ्नविहता विरमन्ति मध्याः।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः**
**प्रारब्धमुत्तमजना न परित्यजन्ति।।**

## ५. वियोगिनी

लक्षणम्

**विषमे ससजाः गुरुः, समे।**

**सभराल्लोऽथ गुरुर्वियोगिनी।।**

प्रथमतृतीयपादयोः सगण-सगण-जगणाः गुरुः चेति दशवर्णाः, द्वितीयचतुर्थपादयोः सगण-भगण-रगणाः लघुः गुरुः चेति एकादशवर्णाः भवन्ति चेत् वियोगिनी नाम वृत्तं स्यात्। अस्य वृत्तस्य सुन्दरी इति नामान्तरं वर्तते।

उदाहरणम्

| स | स | ज | गु |
|---|---|---|---|
| UU— | UU— | U—U | — |
| **नहि दे** | **हिनि शो** | **भनं भ** | **वे-** |

| स | भ | र | ल गु |
|---|---|---|---|
| UU— | —UU | — U — | U — |
| च्चरिता | र्थे सति | जीवितं | पुनः। |

**सुतरां नटने समापिते**

**स च रङ्गाद्विरमेत्कुशीलवः ।।**

पठनप्रवर्त्तनानि

- वृत्तानुसारं ताललयपूर्वकं पद्यांशानि आलपत।
- इतरग्रन्थेभ्यः पठितवृत्तानाम् उदाहरणानि सञ्चिनुत।
- तालानुसारी एव वृत्तानि इत्यस्मिन् कार्ये चर्चां कुरुत।

## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिक्तया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | पद्यानि आलपितानि | | १/२/३/४ | |
| २ | उदाहरणानि सञ्चितानि | | १/२/३/४ | |
| ३ | चर्चा कृता | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

## ६.1 अनुबन्धः - पुरतो भ्रम लोकचक्र

1. മതി തീക്ഷ്ണശരങ്ങളേ! ശ്രമം
ക്ഷതമേലാ മരവിച്ചൊരെന്മനം.
കുതികൊള്ളുക ലോകചക്രമേ!
ഹതയാം സീതയെയിങ്ങു തള്ളുക.

2. ചരിതാർത്ഥതയാർന്ന ദേഹിയിൽ
തിരിയെ ശോഭനമല്ല ജീവിതം.
പിരിയേണമരങ്ങിൽ നിന്നുടൻ
ശരിയായി കളി തീർന്ന നട്ടുവൻ.

3. ഇനി യാത്ര പറഞ്ഞിടട്ടെ ഹാ!
ദിനസാമ്രാജ്യപതേ! ദിവസ്പതേ!.
അനിയന്ത്രിത ദീപ്തിയാം കതിർ-
ക്കനകാസ്ത്രാവൃതനാം ഭവാനു ഞാൻ.

4. സുസിതാംബരനായി വൃദ്ധനായ്
ബിസിനീതന്തുമരീചികേശനായ്.
ലസിതസ്മിതനായ ചന്ദ്രികാ-
ഭസിതസ്നാതമൃഗാങ്ക! കൈതൊഴാം.

5. അതിദൂരതമസ്സിനെ തുര-
ന്നെതിരെ രശ്മികൾ നീട്ടി പീന്നെയും.
ദ്യുതികാട്ടുമുഡുക്കളേ! പരം
നതി നിങ്ങൾക്കതിമോഹനങ്ങളേ!.


6. സ്വയമന്തിയിലും വെളുപ്പിലും
നിയതം ചിത്രവിരിപ്പു നെയ്തുടൻ.
വിയദാലയ വാതിൽ മൂടുമെൻ
പ്രിയസന്ധ്യേ! ഭവതിക്കു വന്ദനം.

7. അതിരമ്യബഹിർജ്ജഗത്തൊടി-
ന്നഥവാ വേർപിരിയേതില്ല ഞാൻ.
ക്ഷിതിയിൽ തനു ചേരുമെൻ മനോ-
രഥമിബ്ഭംഗികളോടുമൈക്യമാം.

8. ജനയിത്രി! വസുന്ധരേ! പരം
തനയസ്നേഹമൊടെന്നെയേന്തി നീ.
തനതുജ്ജ്വലമഞ്ജുഭൂവിലേ -
ക്കനഘേ! പോവതു ഹന്ത! കാണ്മു ഞാൻ.

# ६.2 अनुबन्धः - शब्दाह्वयं ज्योतिः

## वर्णानाम् उच्चारणस्थानानि




अ कवर्ग विसर्जनीयः कण्ठस्थानीयाः - अकुहविसर्जनीयानां कण्ठः ।

इ चवर्ग य श एते तालुस्थानीयाः - इचुयशानां तालु ।

ऋ टवर्ग र ष एते मूर्धस्थानीयाः - ऋटुरषाणां मूर्धा।

लृ तवर्ग ल स एते दन्तस्थानीयाः - लृतुलसानां दन्तः।

उ पवर्ग उपध्मानीयौ (पफाभ्यां पूर्व अर्धविसर्गौ) ओष्ठस्थानीयाः - उपूपध्मानीयानामोष्ठः।

ए ऐ एतौ कण्ठतालुस्थानीयौ - एदैतोः कण्ठतालु।

ओ औ एतौ कण्ठोष्ठस्थानीयौ - ओदौतोः कण्ठोष्ठम्।

वकारः दन्तोष्ठस्थानीयः - वकारस्य दन्तोष्ठम्।

जिह्वामूलीयः जिह्वामूलस्थानीयः - जिह्वामूलीयस्य जिह्वामूलम्। (कखाभ्यां प्रागर्धविसर्गः- जिह्वामूलीयः)

अनुस्वारः नासिकास्थानीयः - नासिकानुस्वारस्य।

उच्चारणकालः एवं निर्दिश्यते ।
दीर्घस्वराक्षराणां द्विमात्राकालः, ह्रस्वस्वराक्षराणां एकमात्राकालः,
व्यञ्जनानाम् अर्धमात्राकालः, विसर्गस्य पादमात्राकालः, जिह्वामूलीयोपध्मानीययोः
पादार्धमात्राकालश्च ।

**वर्णोद्भवस्थानकोष्ठकम् ।**

| स्थानानि | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| कण्ठः | तालु | मूर्धा | दन्ताः | ओष्ठौ | नासिका | कण्ठतालु | कण्ठोष्ठम् | दन्तोष्ठम् | जिह्वामूलीयम् |
| अ | इ | ऋ | लृ | उ | ञ | ए | ओ | व | ᳵक |
| क | च | ट | त | प | म | ऐ | औ | | ᳵख |
| ख | छ | ठ | थ | फ | ङ | | | | |
| ग | ज | ड | द | ब | ण | | | | |
| घ | झ | ढ | ध | भ | न | | | | |
| ङ | ञ | ण | न | म | ं | | | | |
| ह | य | र | ल | | | | | | |
| ः | श | ष | स | ᳶप ᳶफ | | | | | |

# ६ .3 अनुबन्धः - कुमारसम्भवम्

## शिवदूषणम्

सन्दर्भः -अन्योऽन्यं वैवाहिकविधियोग्यताभावात् तदनुनवरणस्यानुपयोग्यताम प्रपञ्चयन्नादौ

विवाहकाले अग्निसाक्षिकं पाणिग्रहणमेवाधिकठिनमित्याह -

अवस्तुनिर्बन्धपरे कथं नु ते करोऽयमामुक्तविवाहकौतुकः।
करेण शम्भोर्वलयीकृताहिना सहिष्यते तत्प्रथमावलम्बनम्।।

सारः - हे तुच्छवस्तुहठपरे पार्वति! आबद्धविवाहमङ्गलसूत्रः तव एष हस्तः कटकीकृतसर्पेण हरस्य हस्तेन मन्त्रपूर्वकं प्रथमं परिग्रहणं कथं सहिष्यते? शिवहस्तदर्शनमात्रेण त्वं सभया सती पलायिष्यसे इति भावः।

सन्दर्भः - अथ वधूवरयोर्विवाहसमये वस्त्रपरिधानस्य विरोधमाह-

त्वमेव तावत्परिचिन्तया स्वयं  कदाचिदेते यदि योगमर्हतः।
वधूदुकूलं कलहंसलक्षणं गजानिनं शोणितबिन्दुवर्षि च।।

सारः - हे पार्वति! त्वं तावत् स्वयं परिचिन्तय। कलहंसचित्रितं नवोढायाः दुकूलं रक्तबिन्दुवर्षी वरस्य गजचर्मवसनं च एतत् द्वयं कदापि परस्परं सङ्गच्छते किम्।।

अयुक्तरूपं किमतः परं वद त्रिनेत्रवक्षः सुलभं तवापि यत्।
स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे पदं चिताभस्मरजः करिष्यति।।

सारः - हरिचन्दनलेपयोग्ये ते स्तनद्वये शिवसम्मिलनसमये चिताभस्मः स्थानं करिष्यति। शम्भोः वक्षसि सुलभतया वर्तमानः भस्मरेणुः रक्तचन्दनादि लेपेन शोभायुक्ते पार्वत्याः कुचद्वये केनरूपेण स्पर्शनं करिष्यति। ततः परम् असमीचीनं किमस्ति लोके इति शेषः।

इयं च तेऽन्या पुरतो विडम्बना यदूढया वारणराजहार्यया।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति।।

सारः - अतः परिणयानन्तरं गजेन्द्रोपरि आरुह्य गन्तुं योग्या त्वमपि भर्ता सह वृद्धऋषभस्योपरि आरुह्य भर्तृमन्दिरं गमिष्यसि। त्वया उपस्थितं नन्दिकेश्वरं दृष्ट्वा जनाः उपहसिष्यन्ति इति भावः।

द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावता त्वमस्य लोकस्य च नेत्रकौमुदी।।

सारः - महादेवस्य प्राप्तिकामनया अधुना द्वयं शोच्यतां गतम्। एका शिवशिरोगता लोकप्रसिद्धा चन्द्रकला, द्वितीया (अद्य ) त्रिलोकवासिनः जनस्य नयनान्ददायिनी भवती च।

निवर्तयास्मादसदीप्सितात्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया।।

सारः -अस्मात् कारणात् हे पार्वति शिवप्राप्तिरूपादनिष्टमनोरथात् स्वकीयं मनो निवारय। बहुदोषयुक्तः शिवः कुत्र शुभलक्षणयुक्ता भवती च कुत्र? उभयोः महदन्तरं यथा वैदिकीयूपसंस्कारः श्मशानशूलन्न अर्हति तद्वत् त्वमपि श्मशानवासिनः शिवेन सह सम्बन्धो भवितुम् न अर्हसि।